Digitized by Sarayu Trust Foundation Delhi and eGangotri.

'मास्टर' मणिमालाया द्वाषष्टिमितोमणिः (कर्मकाण्डविभागे २७)

॥ अथ ग्रहप्रयोगः, अर्थात् ग्रहशान्तिः ॥

पञ्चमं संस्करणम्]

पं० श्रीवायुनन्दन मिश्र

[मूल्यं द्वादशाणकाः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

K. K. Sharma
2/11/79

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूमिका

मैंने कर्मकाण्ड विषयक ग्रन्थों में इस पुस्तक का अभाव देखकर तथा पण्डितवर्ग की आवश्यकता का अनुभव करके क्रम-युक्त, स-विधि, शास्त्रोक्तानुकूल 'ग्रहशान्तिपद्धति' निर्माण की है। प्रस्तुत पुस्तक का पण्डित-समाज में इतना आदर हुआ कि अल्प काल ही में चार २ संस्करण समाप्त हो गए। अब यह पञ्चम संस्करण पण्डित-समाज के कर-कमलों में अर्पण करते हुए मुझे अत्यन्त प्रसन्नता होती है। पूर्व संस्करण में जो त्रुटियाँ रह गयी थीं, वे इस संस्करण में दूर कर दी गयी हैं। आशा है, पूर्ववत् इस संस्करण का भी पण्डित-गण यथेष्ट आदर कर मेरे परिश्रम को सफल बनाकर प्रोत्साहन देंगे। इति शम् ॥

'शूर्पवद्दोषमुत्सृज्य गुणं गृह्णन्ति साधवः'।

मध्यमेश्वर, काशी
अक्षय तृतीया,
१९९६

विनीत—
वायुनन्दन मिश्रः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रहशान्तिप्रयोगस्य विषयानुक्रमणिका ।

विषय	प०	पृ०	पं०
मङ्गलाचरणम्	१	१	१
अनुक्रमः	१	१	३
अथ कर्त्तव्यता	२	१	४
मङ्गलमन्त्राः	३	१	१
सङ्कल्पः	६	२	१
गणपत्यावाहनम्	८	१	२
गौर्य्यावाहनम्	९	१	२
प्रतिष्ठा	९	१	५
गणपतिपूजनं गौरीपूजनं च	९	२	२
कलशलक्षणम्	२०	१	६
सप्त धान्यानि	२०	२	३

विषय	प०	पृ०	पं०
सप्त मृदः	२०	२	६
सर्वौषधानि	२०	२	७
पञ्च पल्लवाः	२१	१	२
पंचरत्नानि	२१	१	३
अथ कलशस्थापनम्	२१	१	६
वरुणपूजा	२३	१	६
गंगाद्यावाहनम्	२३	१	३
कलशप्रतिष्ठा पूजनं च	२४	२	२
कलशप्रार्थना	२५	२	३
पुण्याहवाचनम	२६	१	७
अथाभिषेकः	३१	२	४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विषय	प०	पृ०	पं०
अविघ्नपूजनम्	३७	२	४
अथ मण्डपदेवताप्रतिष्ठा	३८	१	५
मंडपार्थं स्तम्भारोपणक्रमः	३८	१	६
मंडपपूजनम्	३९	२	७
मातृकापूजनम्	४०	२	५
वसोर्द्धारापूजनम्	४६	१	६
आयुष्यमंत्रजपः	४८	१	४
नान्दीश्राद्धम्	४९	१	१
आचार्यादिवरणम्	५४	१	७
आचार्यस्य संकल्पः	५६	२	२
दिग्रक्षणम्	५६	२	४
पञ्चगव्यकरणम्	५८	१	३
प्रोक्षणम्	५८	२	४
सर्वतोभद्रलिङ्गतोभद्रदेवतास्थापनक्रमः	५९	१	१
सर्वतोभद्रकारिका	५९	१	३

विषय	प०	पृ०	पं०
लिङ्गतोभद्रकारिका	५९	२	२
पंचरङ्गकारिका	६०	१	३
सर्वतोभद्रस्थापनम्	६०	२	१
लिङ्गतोभद्रदेवताविशेषः	७२	१	४
सर्वतोभद्रोपरि कलशप्रधान-स्थापनं पूजनं च	७२	१	४
अग्न्युत्तारणविधिः	७९	१	७
प्राणप्रतिष्ठा	८१	१	२
पञ्चभूसंस्कारः	८१	२	४
अग्निस्थापनम्	८१	२	६
सूर्यादिग्रहाणां स्थापनकारिकाः	८२	१	१
सूर्याद्यावाहनम्	८३	१	५
अधिदेवतास्थापनपू०	८६	१	५
प्रत्यधिदेवतास्थापनपू०	८९	१	१
पंचलोकपालस्थापनपू०	९१	१	७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विषय	प०	पृ०	पं०
दशदिक्पालस्थापनपू०	९३	१	५
सूर्यादिप्रतिष्ठापूजा	९६	१	२
कुशकण्डिका	९७	१	६
आघारावाज्य भागहोमः	१००	१	४
सूर्यादिग्रहाणांहोमः	१०१	१	४
प्रधानहवन	१०३	१	१
ब्रह्मादिमण्डलहोमः	१०३	१	४
अग्निपूजनम्	१०३	१	५
स्विष्टकृद्धोमः	१०३	२	२
नवाहुतीः	१०३	२	४
दिक्पालबलिः	१०४	२	६
ग्रहबलिः	१०६	२	४
दिक्पालेभ्य एकतंत्रेण बलिदानम्	१०८	१	७
सूर्यादिभ्य एकतंत्रेण बलिदानम्	१०९	१	४
क्षेत्रपालबलिः	११०	१	२

विषय	प०	पृ०	पं०
पूर्णाहुतिः	१११	२	६
वसोर्द्धारा	११४	१	५
त्र्यायुषकरणम्	११५	२	३
संस्रवप्राशनम्	११५	२	६
पवित्राभ्यां मार्जनम्	११५	२	६
ब्रह्मणे पूर्णपात्रदानम्	११६	१	१
श्रेयः संपाद्यदानम्	११६	१	७
आचार्यादिभ्यो दक्षिणादानम्	११७	२	१
पीठदानम्	११८	२	१
अभिषेकः	११८	२	६
विसर्जनम्	१२०	२	२
क्षमापनम्	१२२	१	१
विष्णुस्मरणम्	१२२	१	४
तिलकाशीर्वादः	१२२	१	६

इति विषयानुक्रमः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीगणेशाय नमः ॥ साम्बं गणपतिं नत्वा विश्वेशं माधवं तथा ॥ गुरुं ज्ञानप्रदं चैव मातरं पितरं तथा ॥ १ ॥ ग्रन्थसारं समुद्धृत्य बालानां हितसिद्धये॥ वायुनन्दनमिश्रेण निबन्धः क्रियतेऽधुना ॥ २॥ अथानुक्रमः ॥ सुस्नातः प्राङ्मुखो भूत्वा यजमानः कृताह्निकः ॥ आहूय ब्राह्मणान्कुर्यात् प्रतिज्ञां विधिवत्तदा ॥ १ ॥ गणेशपूजनं कृत्वा वरुणं च ततो यजेत् ॥ पुण्याहवाचनं कृत्वाऽभिषेकं कारयेत्ततः ॥ २॥ गौर्यादिपूजनं चैव घृतमातृकपूजनम् ॥ आयुष्यमन्त्रपाठं तु नान्दीश्राद्ध-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मतः परम् ॥३॥ सर्वेषां वरणं कृत्वा सर्वतोभद्रपूजनम् ॥ ततः प्रधानदे-
वस्य पूजनं च समारभेत् ॥४॥ स्थाप्याग्निं सुग्रहाणां च स्थापनं कुश-
कण्डिकाम् ॥ कृत्वा ततो यजेदाज्याऽऽहुतिं भक्तिपुरस्सरः॥५॥सूर्य्या-
दीनांग्रहाणाञ्च होमः कार्यास्तिलादिभिः ॥ ततः प्रधानदेवस्य होमः
कार्यों यथाविधि ॥६॥ सर्वतोभद्रदेवानां हवनं वै समाचरेत् ॥ पूजनं
स्विष्टकृच्चैव घृतेनैव नवाहुतिः ॥७॥ दिक्पालेभ्यो बलिं दीपं सूर्यादी-
नामतः परम् ॥ प्रधानस्य बलिं दद्याद् दद्यात्क्षेत्राधिपाय च ॥८॥पूर्णा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हुतिमथो हुत्वा वसोर्द्धारां समाचरेत् ॥ भस्मना त्र्यायुषं कृत्वा संस्र-
वप्राशनादिकम् ॥९॥ श्रेयोदानं ब्राह्मणेभ्यो दद्यात् स्वर्णसुदक्षिणाम् ॥
कारयेदभिषेकादीन् विसर्जनमतः परम् ॥१०॥ भोजनं ब्राह्मणैः सार्द्धं
सतां चायमनुक्रमः ॥ अथकर्तव्यता ॥ चन्द्रादिशुभग्रहानुकूलसमये
शुभे दिने शुभे लग्ने च कृतनित्यक्रियो यजमानः शुभासने प्राङ्मुख
उपविश्य स्वदक्षिणतः पत्नीं चोपवेश्य । ॐ केशवाय नमः १ ॐ नारा-
यणाय नमः २ ॐ माधवायनमः ३ ॥ इति त्रिराचम्य ॥ ॐ पवित्रेस्थो

टि० १ संस्कार्यः पुरुषोवापि स्त्री वा दक्षिणतः सदा ॥ संस्कारकर्ता सर्वत्र तिष्ठेदुत्तरतः सदा ॥ इति प्रयोगपारिजाते ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

व्वैष्णव्यौ सवितुर्व्वः प्प्रसवऽउत्पुनाम्म्यच्छिद्द्रेणपवित्रेण सूर्य्यस्य
रश्मिभिः ॥ तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छके
यम् ॥ १ ॥ इति मन्त्रेण पवित्रधारणं कृत्वा ॥ ततः प्राणायामत्रयं
कुर्यात् । ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरे-
त्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥ ॐ पुण्डरीकाक्षः पुनातु ३ ॥
इत्यात्मानं पूजासामग्रीं च सम्प्रोक्ष्य ॥ तण्डुलपूरितताम्रपात्रे
मृण्मये वा कुंकुमेनाष्टदलं पद्मं कृत्वा तदुपरि गोमयमयीं गौरीं

टि० १ पवित्रलक्षणं कात्यायनेनोक्तम् यथा—नान्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ॥ प्रादेशमात्रं विज्ञेयं पवित्रं यत्रकुत्रचित् ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

फलमयं गणेशं च संस्थाप्य हस्ते अक्षतपुष्पाणि गृहीत्वा आनो-
भद्राआदीन् मङ्गलमन्त्रान्पठेत् ॥ ॐ आनोभद्राःक्रतवो यन्तु
विश्वतोदब्धासोऽअपरीतासऽउद्भिदः ॥ देवानोयथासदमिद्वृधेऽ-
असन्नप्रायुवो रक्षितारोदिवे दिवे ॥ १ ॥ देवानांभद्रासुमतिर्ऋजूय-
तान्देवानांरातिरभिनोनिवर्त्तताम् ॥ देवानांसख्यमुपसेदिमाव
यन्देवानऽआयुःप्रतिरन्तुजीवसे ॥२॥ तान्पूर्वयानिविदाहूमहेवय-
म्भगम्मित्रमदितिन्दक्षमस्रिधम् ॥ अर्य्यमणंवरुणंसोममश्विना

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सरस्वतीनᳪसुभगामयस्करत् ॥ ३ ॥ तन्नोव्वातोमयोभुव्वातुभेषजन्त
न्मातापृथिवीतत्पिताद्यौः ॥ तद्ग्रावाणᳪसोमसुतोमयोभुवस्तदश्विना
शृणुतन्धिष्ण्यासुवम् ॥४॥ तमीशानं जगतस्तस्थुषस्पतिन्धियञ्जि
न्वमवसेहूमहेव्वयम् ॥ पूषा नोऽयथाव्वेदसामसद्वृधेरक्षितापायुरदब्धᳪ
स्वस्तये ॥५॥ स्वस्तिनऽइन्द्रोव्वृद्धश्रवाᳪस्वस्तिनः पूषाव्विश्ववेदाᳪ ॥
स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिᳪस्वस्तिनोबृहस्पतिर्दधातु ॥ ६ ॥ पृष
दश्वामरुतᳪपृश्निंमारतᳪशुभंय्यावानोव्विदथेषु जग्मयᳪ ॥ अग्नि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

जि॒ह्वाम॒नवं॑व॒ꣳसूरचक्षसो॒व्विश्वे॑नोदे॒वाऽअव॒सागं॑मन्नि॒ह ॥७॥ भ॒द्रंकर्णे॑
भिꣳश्रृणुयामदेवाभ॒द्रंप॑श्येमा॒क्षाभि॑र्य्यजत्राꣳ ॥ स्थि॒रैरङ्गै॑स्तुष्टु॒वाꣳ
संस्त॒नूभि॒र्व्य॑शेमहिदे॒वहि॑तं॒यदायुः ॥८॥ श॒तमिन्नुश॒रदो॒ऽअन्ति॑
देवा॒ यत्रा॑नश्च॒क्राज॒रसं॑त॒नूना॑म् ॥ पु॒त्रासो॒यत्र॑पि॒तरो॒भव॑न्ति॒मानो॑म॒
ध्यारी॑रिष॒तायु॒र्गन्तोꣳ ॥९॥ अदि॑ति॒र्द्यौरदि॑तिर॒न्तरि॑क्ष॒मदि॑तिर्म्मा॒
तासपि॒तासपु॒त्रः ॥ विश्वे॑दे॒वाऽअदि॑ति॒ ꣳ पञ्च॒जना॒ऽअदि॑तिर्ज्जा॒त
मदि॑ति॒र्ज्जनि॑त्वम् ॥१०॥ द्यौःशान्ति॑र॒न्तरि॑क्ष॒ꣳशान्तिः पृथि॒वीशा

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः
शान्तिर्ब्रह्मशान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सामाशान्ति
रेधि ॥ ११ ॥ यतोयतः समीहसे ततोनोऽअभयङ्कुरु ॥ शन्नः कुरुप्रजा
भ्यो भयन्नः पशुभ्यः ॥ १२ ॥ सुशान्तिर्भवतु ॥ श्रीमन्महागणाधिप-
तये नमः ॥ लक्ष्मीनारायणाभ्यां नमः ॥ उमामहेश्वराभ्यां नमः ॥
वाणीहिरण्यगर्भाभ्यां नमः ॥ शचीपुरन्दराभ्यां नमः ॥ मातापितृभ्यां
नमः ॥ इष्टदेवताभ्यो नमः ॥ कुलदेवताभ्यो नमः ॥ ग्रामदेवताभ्यो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः ॥ वास्तुदेवताभ्यो नमः ॥ स्थानदेवताभ्यो नमः॥सर्वेभ्यो देवेभ्यो नमः ॥ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥ विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम् ॥ वन्दे काशीं गुहं गङ्गां भवानीं मणिकर्णिकाम् ॥ १ ॥ वक्रतुण्डमहाकाय कोटिसूर्यसमप्रभ ॥ निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ २ ॥ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ॥ लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥ ३ ॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ॥ द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ ४ ॥ विद्यारम्भे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विवाहे च प्रवेशे निर्गमे तथा ॥ संग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते
॥५॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ॥ प्रसन्नवदनं ध्यायेत् सर्व
विघ्नोपशान्तये ॥ ६ ॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ॥
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥७॥ सर्वमङ्गलमाङ्गल्ये शिवे
सर्वार्थसाधिके ॥ शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ ८ ॥
सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ॥ येषां हृदिस्थो भगवान्मङ्ग
लायतनं हरिः ॥९॥ तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विद्याबलंदैवबलं तदेव लक्ष्मीपते तेङ्घ्रियुगं स्मरामि ॥१०॥ लाभस्तेषां
जयस्तेषां कुतस्तेषां पराजयः॥ येषामिन्दीवरश्यामो हृदयस्थोजना
र्दनः॥११॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः॥ तत्र श्रीर्विजयो
भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ १२ ॥ अनन्याश्चिन्तयन्तो मां ये जनाः
पर्युपासते ॥ तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ १३ ॥
स्मृतेःसकलकल्याणं भाजनं यत्र जायते॥ पुरुषं तमजं नित्यं व्रजामि
शरणं हरिम् ॥ १४ ॥ सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥ १५ ॥ यजमानः जलाक्षतद्रव्यं चादाय सङ्कल्पं कुर्यात् । ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणोऽह्नि द्वितीयेपरार्द्धे विष्णुपदे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमेयुगे कलियुगे कलिप्रथमचरणे भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तैकदेशे (अविमुक्तवाराणसीक्षेत्रे आनन्दवने महाश्मशाने गौरीमुखे त्रिकण्टकविराजिते) भागीरथ्याः पश्चि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मे भागे विक्रमशाके बौद्धावतारे अमुकनामसंवत्सरे श्रीसूर्ये अमुका-
यने अमुकऋतौ महामाङ्गल्यप्रदमासोत्तमे मासे अमुकमासे
अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे
अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते श्रीसूर्ये
अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथाराशिस्थान-
स्थितेषु सत्सु एवं ग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ
२ अमुकगोत्रः अमुकशर्माहं मम आत्मनः श्रुतिस्मृतिपुराणो-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्तफलप्राप्त्यर्थं कायिकवाचिकमानसिकसांसर्गिकचतुर्विधपातक दुरितक्षयद्वारा धर्मार्थकाममोक्षचतुर्विधपुरुषार्थप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं ग्रहशान्तिमहं करिष्ये (वा अमुकशान्तिं करिष्ये) तदङ्गत्वेन स्वस्तिपुण्याहवाचनं (अविघ्नपूजनम् मण्डपदेवतापूजनं) मातृकापूजनं वसोर्द्धारापूजनं आयुष्यमन्त्रजपं साङ्कल्पिकेन विधिना नान्दीश्राद्धमाचार्यादिवरणानि (ग्रहानुकूलतासिद्धयर्थं ग्रहयज्ञं) च करिष्ये ॥ तत्रादौ निर्विघ्नता-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिद्ध्यर्थं गणेशाम्बिकयोः पूजनमहं करिष्ये इति सङ्कल्पं कृत्वा षोडशोपचारैः गणपतिं पूजयेत् ॥ हस्ते अक्षतान् गृहीत्वा गणपति-मावाहयेत् ॥ तत्र मन्त्रः ॥ एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ॥ पाशांकुशधरं देवं ध्यायेत् सिद्धिविनायकम् ॥ १ ॥ ध्याये-द्गजाननं देवं तप्तकाञ्चनसन्निभम् ॥ चतुर्भुजं महाकायं सर्वाभरणभूषितम् ॥ २ ॥ दंताक्षमालापरशुं पूर्णमोदकधारि-

टि० १ षोडशोपचारास्तु कर्मप्रदीपे—"आवाहनासने पाद्यमर्घ्यमाचमनीयकम् ॥ स्नानं वस्त्रोपवीतं च गंधमाल्यान्यनुक्रमात् ॥ १ ॥ धूपं दीपं च नैवेद्यं ताम्बूलं च प्रदक्षिणा ॥ पुष्पाञ्जलिरिति प्रोक्ता उपचारास्तु षोडश ॥२॥" "फलेन सफलावाप्तिः साङ्गता दक्षिणार्पणात्" इति ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णम् ॥ मोदकासक्तशुंडाग्रमेकदन्तं विनायकम् ॥ ३ ॥ वां ॥ हे हेरम्ब
त्वमेह्येहि ह्यम्बिकात्र्यम्बकात्मज ॥ सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभ
पितुः पितः ॥ नागास्यं नागहारं त्वां गणराजं चतुर्भुजम् ॥ भूषितं
स्वायुधैर्दिव्यैः पाशांकुशपरश्वधैः ॥४॥ आवाहयामि पूजार्थं रक्षार्थं
च मम क्रतोः ॥ इहागत्य गृहाण त्वं पूजां यागं च रक्ष मे ॥ ५ ॥ ॐ
गणानांत्वागणपतिᳫं हवामहेप्रियाणांन्त्वाप्रियपतिᳫं हवामहेनिधी
नांत्वांनिधिपतिᳫं हवामहे व्वसोमम ॥ आहमंजानिगर्भधमात्वम

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जासिगर्भधम् ॥ ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहिताय गणपतये नमः
गणपतिमावाहयामि स्थापयामि ॥ हेमाद्रितनयां देवीं वरदां शङ्कर-
प्रियाम् ॥ लम्बोदरस्य जननीं गौरीमावाहयाम्यहम् ॥ ॐ अम्बेऽअ-
म्बिकेऽम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकः सुभद्रिका
ङ्काम्पीलवासिनीम् ॐ भूर्भुवः स्वः गौर्यै नमः गौरीमावाहयामि
स्थापयामि ॥ ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमंत
नोत्वरिष्टं यज्ञ ६ समिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामो३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रतिष्ठ ॥ १ ॥ अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ॥ अस्यै
देवत्वमर्चायैमामहेति च कश्चन ॥ १ ॥ गणेशाम्बिके सुप्रतिष्ठिते वरदे
भवतम् ॥ विचित्ररत्नखचितं दिव्यास्तरणसंयुतम् ॥ स्वर्णसिंहासनं
चारुगृह्णीष्वसुरपूजित ॥ १ ॥ ॐ पुरुषऽएवेदꣳसर्वं यद्भूतं यच्च भाव्य
म् ॥ उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ ॐ गणेशाम्बिकाभ्यां
नमः आसनं स० ॥ ॐ सर्वतीर्थसमुद्भूतं पाद्यं गन्धादिभिर्युतम् ॥
विघ्नराज गृहाणेदं भगवन्भक्तवत्सल ॥ २ ॥ ॐ एतावानस्य महिमा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तोज्यायाँश्चपूरुषः॥ पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतन्दिवि
ग० पाद्यम्० ॥ ॐ गणाध्यक्षनमस्तेऽस्तु गृहाण करुणाकर॥ अर्घ्यं
च फलसंयुक्तं गंधमाल्याक्षतैर्युतम्॥ ॐ त्रिपादूर्ध्वऽउदैत्पुरुषःपादो
स्येहाभवत्पुनः ॥ ततो विष्वङ्व्यक्रामत्साशनानशनेऽअभि
॥ ३ ॥ ग० अर्घ्यम् ॥ विनायक नमस्तुभ्यं त्रिदशैरभिवन्दित ॥
गंगोदकेन देवेश कुरुष्वाचमनं प्रभो॥ॐततोव्विराडजायतव्विराजोऽ
अधिपूरुषः॥ सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ ४ ॥ ग०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्र० आचमनम् ॥ मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम् ॥ तदिदं प्र०
१० कल्पितं देव स्नानार्थं प्रतिगृह्यताम् ॥ ॐ तस्माद्यज्ञात्सर्वहुतꣳसम्भृ
तं पृषदाज्यम् ॥ पशूँस्ताँश्चक्रे वायव्यानारण्याग्ग्राम्याश्च ये ॥ ५ ॥
ग० स्नानम्० ॥ अथवा । ॐ गणेशाम्बि० एतानि पाद्यार्घ्याचमनी
यस्नानीयपुनराचमनीयानि स० ॐ पञ्चनद्यः सरस्वतीमपियं
न्तिसस्रोतसꣳ ॥ सरस्वतीतुपंचधा सो देशेभवत्सरित् ॥ पञ्चामृतं १०
मयानीतं पयो दधि घृतं मधु ॥ शर्करा च समायुक्तं स्नानार्थं प्रति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गृह्यताम् ॥ १ ॥ ॐ ग० पञ्चामृतस्नानं स० । अथवा ॥ कामधेनु-
समुद्भूतं सर्वेषां जीवनं परम् ॥ पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पि
तम् ॥ ॐ पयंः पृथिव्यांपयऽओषंधीषुपयो दिव्युन्तरिक्षे पयोधाः ॥
पयंस्वतीः प्प्रदिशंः सन्तुमह्यम् ॥ ॐ ग० पयः स्नानं स० ॥ पयसस्तु
समुद्भूतं मधुराम्लं शशिप्रभम् ॥ दध्यानीतं मया देव स्नानार्थं प्रति
गृह्यताम् ॥ ॐ दुधिक्राव्णोऽअकारिषंजिष्णोरश्वंस्यवाजिनंः ॥
सुरभिनोमुखांकरत्प्रणऽआयूंषितारिषत् ॥ ॐ ग० दधिस्नानं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स० ॥ नवनीतसमुत्पन्नं सर्वसंतोषकारकम् ॥ घृतं तुभ्यं प्रदास्यामि
स्नानार्थं प्रतिगृह्यताम् ॥ ॐ घृतम्मिमिक्षेघृतमंस्य योनिर्घृतेश्रितो
घृतम्वंस्यधामं ॥ अनुष्वधमावंहमादयंस्वस्वाहांकृतं वृषभवक्षिहव्यम् ॥ ॐ ग० घृतस्नानं स० ॥ पुष्परेणुसमुद्भूतं सुस्वादु मधुरं
मधु ॥ तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ मधुवाताऽऋतायतेमधुंक्षरान्तिसिन्धंवः ॥ माध्वीर्न्नः सन्त्वोषंधीः ॥ १ ॥
मधुनक्तंमुतोषसोमधुंमुत्पार्थिवः रजं ॥ मधुद्यौरस्तु नः पिता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ २ ॥ मधुमान्नोव्वनस्पतिर्म्मधुमाँऽअस्तु सूर्य्यः ॥ माध्वीर्ग्गावो
भवन्तुनः ॥ ३ ॥ ॐ ग० मधुस्नानं स० ॥ इक्षुरससमुद्भूतां शर्करां
पुष्टिदां शुभाम् ॥ मलापहारिकां दिव्यां स्नानार्थं प्रतिगृह्यताम् ॥ ॐ
अपा ꣳ रसमुद्वयसꣳ सूर्य्येसन्तꣳ समाहितम् ॥ अपा ꣳ रसस्य
योरसस्तंव्वोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्येष
तेयोनिरिन्द्रायत्वाजुष्टंतमम् ॐ ग० शर्करास्नानं स० ॥ ॐ आपो
हिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥ अथवा ॥ शुद्ध

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वांलः सर्व्वशुद्धंवालो मणिवालस्तऽआंश्विनाः श्येतः श्येताक्षो
रुणस्ते रुद्राय पशुपतये कर्णायामाऽअवलिप्तारौद्रा नभोरूपाः
पार्ज्जन्याः ॥ गङ्गा च यमुना चैव गोदावरि सरस्वती ॥ नर्मदा
सिन्धुकावेरी स्नानार्थं प्रतिगृह्यताम् ॥ ॐ ग० शुद्धोदकस्नानं स०
ॐ ग० स्नानान्ते आचमनं स० । ॐ युवासुवासाः परिवीतऽआगा
त्सऽउश्रेयान्भवतिजायमानः॥ तं धीरासः कवयऽउन्नयन्ति स्वाध्यो
मनसादेवयंतः॥ शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम् ॥ देहाल-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे ॥ ॐ ग० वस्त्रं स० ॐ ग० आचमनं स० ॥ ॐ सुजातो ज्योतिषा सह शर्म्म वरूथमासदत्स्वः ॥ वासोऽ अग्ने विश्वरूप ꣳ संव्ययस्व विभावसो ॥ उपवस्त्रं ॐ ग० आचमनं सम० ॥ वा ॐ ग० वस्त्रोपवस्त्रार्थे रक्तसूत्रं समर्पयामि ॥ अलङ्करणार्थे अक्षतान् स० ॥ ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ॥ आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥

 नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ॥ उपवीतं मया दत्तं गृहाण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परमेश्वर ॥ ॐ ग० यज्ञोपवीतं स० ॥ ॐ ग० आचमनं स० ॥ श्रीखण्डं
चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ॥ विलेपनं सुरश्रेष्ठ चन्दनं प्रति
गृह्यताम् ॥ ॐ त्वां गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः ॥
त्वामोषधेसोमोराजाविद्वान्यक्ष्मादमुच्यत ॐ ग० गन्धं स० ॥
अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्ताः सुशोभिताः । मया निवेदिता भक्त्या
गृहाण परमेश्वर ॥ ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत ॥ अस्तो
षतस्वभानवोविप्रानविष्ठयामतीयोजान्विन्द्रतेहरी ॥ ॐ ग० अक्ष-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तान् स० ॥ माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ॥ मया-
हृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥ १ ॥ ओषधीः प्रतिमोदध्वं पु
ष्पवतीः प्रसूवरीः ॥ अश्वाऽइवसजित्वरीर्वीरुधः पारयिष्णवः ॥ ॐ
ग० पुष्पमालां स० ॥ दूर्वाङ्कुरान्सुहरितानमृतान्मङ्गलप्रदान् ॥
आनीतांस्तव पूजार्थं गृहाण गणनायक ॥ ॐ काण्डात्काण्डात्प्ररोहं-
न्तीपरुषः परुषस्परि ॥ एवानोदूर्वे प्रतनु सहस्रेण शतेन च ॥ ॐ ग०
दूर्वाङ्कुरान्स० ॥ सिन्दूरं शोभनं रक्तं सौभाग्यं सुखवर्द्धनम् ॥ शुभदं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कामदं चैव सिन्दूरं प्रतिगृह्यताम् ॥ ॐ सिन्धोरिव प्प्राध्वने शूंघना
सोव्वातंप्प्रामियहं पतयन्तियह्वाः ॥ घृतस्यधाराऽअरुषो नव्वाजी-
काष्ठाभिन्दन्नूर्म्मिभिः पिन्वमानः ॥ ग० सिन्दूरं स० । नानापरि-
मलैर्द्रव्यैर्निर्मितं चूर्णमुत्तमम् । अबीरनामकं चूर्णं गन्धं चारु प्रगृह्य-
ताम् ॥ ॐ अहिरिवभोगैः पर्य्येतिबाहुञ्ज्यायाहेतिंपरिबाधमानः ॥
हस्तघ्नो विश्वाव्वयुनानिविद्वान्पुमान्पुमांसंपरिपातुविश्वतः ॥
ॐ ग० नानापरिमलद्रव्याणि स० वनस्पतिरसोद्भूतो गन्धाढ्यो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गन्ध उत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ ॐ
धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामः। देवानां-
मसि वह्नितमꣳ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम् ॥ ॐ ग०
धूपं स० ॥ साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ॥ दीपं गृहाण
देवेश त्रैलोक्यतिमिरापहम् ॥ भक्त्या दीपं प्रयच्छामि देवाय परमा-
त्मने ॥ त्राहि मां निरयाद्घोराद्दीपज्योतिर्नमोऽस्तु ते ॥ ॐ अग्निर्ज्यो-
तिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ॥ अग्नि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वर्च्चोज्ज्योतिर्व्वर्च्चꣳस्वाहासूर्य्योव्वर्च्चोज्ज्योतिर्व्वर्च्चꣳ स्वाहा ॥ ज्ज्योतिꣳ
सूर्य्यꣳ सूर्य्यो ज्ज्योतिꣳ स्वाहा ॥ १ ॥ ॐ ग० दीपं स० ॥ हस्त
प्रक्षालनम् ॥ नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु ॥ ईप्सितं मे
वरं देहि परत्र च परां गतिम् ॥ शर्कराखण्डखाद्यानि दधिक्षीरघृतानि
च ॥ आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम् ॥ ॐ नाभ्याऽआ-
सीदन्तरिक्षꣳशीर्ष्णो द्यौः समवर्त्तत ॥ पद्भ्याम्भूमिर्द्दिशꣳ श्रो-

१ टि०—अथवा अन्नंपतेन्नंस्यनोदेह्यनमीवस्यंशुष्मिणंः ॥ प्रप्रंदातारंन्तारिषऽऊर्ज्जंन्नोधेहिद्विपदेचतुष्पदे ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्राात्तथांल्लोकाँ२ऽअंकल्पयन् ॥ ॐ प्राणाय स्वाहा ॥ ॐ अपानाय स्वा० ॐ समानाय स्वा० ॥ ॐ उदानाय स्वा० ॥ ॐ व्यानाय स्वा० ॐ ग० नैवेद्यं स० ॥ आचमनीयं मध्ये पानीयं उत्तरा पोशनं स० ॥ ॐ चन्दनं मलयोद्भूतं कस्तूर्यादिसमान्वितम् ॥ करोद्वर्तनकं देव गृहाण परमेश्वर ॥ ॐ अ्ँ शुनांतेअ्ँ शुः पृंच्यतां परुंषापरुंः ॥ गन्धस्तेसोमंमवतुमदांयुरसोऽअच्युंतः ॥ ॐ ग० चन्दनेन करोद्वर्तनं स० ॥ ॐ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ ॐ यत्पुरुषेणहविषादेवा
यज्ञमतन्न्वत॥ व्वसन्तोस्यासीदाज्यंग्ग्रीष्मऽइध्मश्शरद्धविः॥ ॐ ग०
मुखवासार्थं पूगीफलताम्बूलं स० ॥ इदं फलं मया देव स्थापितं
पुरतस्तव॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि। ॐ याः फलिनी
र्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानो
मुञ्चन्त्वᳪहसः ॥ गणे० नारिकेलफलं स० ॥ हिरण्यगर्भगर्भस्थं
हेमबीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ हिरण्यगर्ब्भः समवर्त्तताग्ग्रे भूतस्य जातः पतिरेकऽआसीत् ॥
सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मै देवायहविषा विधेम ॥ ॐ ग०
कृतायाः पूजायाः साद्गुण्यार्थे द्रव्यदक्षिणां स० ॥ कदलीगर्भसम्भूतं
कर्पूरं तु प्रदीपितम् ॥ आरार्तिकमहं कुर्वे पश्य मे वरदो भव ॥
ॐ इद ँ हविः प्रजननम्मेऽअस्तु दशवीर ँ सर्व्वगण ँ स्वस्तये
आत्मसनि प्प्रजासनि पशु सनि लोकसन्न्यभयसनि । अग्निः
प्प्रजाम्बहुलाम्मे करोत्वन्नम्पयोरेतोऽअस्म्मासु धत्त ॥ आरात्रिपा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

थिंवꣳ रजं॑÷पितुर॑प्प्रायिधामभिः ॥ दिवः सदां॑ᳫंसिबृहतीवि
तिष्ठंस॒ऽआत्त्वेषंवर्त्ततेतमं÷ ॐ ग० कर्पूरनीराजनं स० ॥ नानासु-
गन्धिपुष्पाणि यथाकालोद्भवानि च ॥ पुष्पाञ्जलिर्मया दत्तो गृहाण
परमेश्वर॥ॐ यज्ञेनंयज्ञमंयजन्तदेवास्तानिधर्म्माणिप्प्रथमान्न्यां-
सन् ॥ तेहनाकंम्माहिमानं÷सचन्तयत्रपूर्वे साध्याःसन्तिदेवाः ॥
ॐ गणानांन्त्वा गणपंतिꣳहवामहे प्रियाणांन्त्वा प्रियपंतिꣳहवाम
हेनिधीनान्त्वां निधिपतिꣳहवामहे वसो मम ॥ आहमंजानि गर्भ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धमा त्वमं जासि गर्भधम् ॥ १ ॥ ॐ अम्बेऽअम्बिकेम्बालिके नमान
यतिकश्चन॥ससंस्त्यश्वकःसुभंद्रिकाङ्काम्पीलवासिनीम् ॥ ॐ राजा-
धिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे॥स मे कामान्का-
मकामाय मह्यं कामेश्वरो वैश्रवणो ददातु ॥ कुबेराय वैश्रवणाय
महाराजाय नमः। ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं
पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायै स्यात् सार्व
भौमस्सार्व्वायुषांतादापरार्धात् पृथिव्यैसमुद्रपर्यन्तायाऽएकराडिति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

तदप्येषश्लोकोभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन्गृहे ॥ आवी
क्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ॥ ॐ विश्वतश्चक्षुरुतवि
श्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात्॥ सम्बाहुभ्यान्धमतिसम्प
तत्रैर्द्यावाभूमीजनयन्देवऽएकः॥ ॐ ग० मन्त्रपुष्पाञ्जलिंस०। यानि[1]
कानि च पापानि ज्ञाताज्ञातकृतानि च ॥ तानि सर्वाणि नश्य-
न्तिप्रदक्षिणपदे पदे॥ ॐ ये तीर्थानिप्रचरन्तिसृ[2]काहस्तानिषङ्गिणः॥
तेषांसहस्रयोजनेवधन्वानितन्मसि ॥ ॐ ग० प्रदक्षिणां० स०॥

---

१ टि० — पदे पदे या परिपूजकेभ्यः सद्योऽश्वमेधादिफलं ददाति ॥ तां सर्वपापक्षयहेतुभूतां प्रदक्षिणां ते परितः करोमि ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ विशेषार्घः ॥ जलगन्धाक्षतफलपुष्पदूर्वादक्षिणाः ताम्रपात्रे प्रक्षिप्य अवनिकृतजानुमण्डलं कृत्वा अर्घपात्रमञ्जलिना गृहीत्वा श्लोकान्पठेत् ॥ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ॥ भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥ १ ॥ द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो॥वरदस्त्वं वरं देहि वांछितं वांछितार्थद॥२॥अनेन सफलार्घ्येण सफलोऽस्तु सदा मम॥ ॐ ग० विशेषार्घ्यं सम०॥अथ प्रार्थना ॥ विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जगद्धिताय ॥ नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गण-
नाथ नमो नमस्ते ॥ १ ॥ भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्व-
राय शुभदाय सुरेश्वराय ॥ विद्याधराय विकटाय च वामनाय भक्त-
प्रसन्नवरदाय नमो नमस्ते ॥ २ ॥ नमस्ते ब्रह्मरूपाय विष्णुरूपाय
ते नमः ॥ नमस्ते रुद्ररूपाय करिरूपाय ते नमः ॥ ३ ॥ विश्वरूप-
स्वरूपाय नमस्ते ब्रह्मचारिणे ॥ भक्तप्रियाय देवाय नमस्तुभ्यं
विनायक ॥ ४ ॥ लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय ॥ निर्विघ्नं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुरु मे देव सर्वकार्येषु सर्वदा ॥५॥ त्वां विघ्नशत्रुदलनेति च सुन्द-
रेति भक्तप्रियेति सुखदेति फलप्रदेति ॥ विद्याप्रदेत्यघहरेति च ये
स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव ॥ ६ ॥ गणेशपूजने कर्म
यन्न्यूनमधिकं कृतम् ॥ तेन सर्वेण सर्वात्मा प्रसन्नोऽस्तु सदा मम ॥७॥
अनया पूजया गणेशाम्बिके प्रीयेतां न मम ॥ इति गणेशपूजनम् ॥

❀ अथ कलशस्थापनम् ❀

तत्रादौ कलशलक्षणं यथा-स्वर्णं वा राजतं वापि ताम्रं मृण्मयजं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्र० तु वा ॥ अकालमव्रणं चैव सर्वलक्षणसंयुतम् ॥ पञ्चाशाङ्गुलवैपुल्य- ग्र०
२० मुत्सेधे षोडशाङ्गुलम् ॥ द्वादशाङ्गुलकं मूलं मुखमष्टाङ्गुलं तथा ॥ अथ
सप्त धान्यानि ॥ यवगोधूमधान्यानि तिलाः कङ्गुस्तथैव च ॥ श्याम-
काश्चणकाश्चैव सप्त धान्यानि संविदुः ॥ अथवा ॥ यवधान्यतिलाः कङ्गुः
मुद्गचणकश्यामकाः ॥ एतानि सप्त धान्यानि सर्वकार्येषु योजयेत् ।
* अथ सप्त मृदः * अश्वस्थानाद्गजस्थानाद्वल्मीकात्सङ्गमाद्ध्रदात् ॥ २०
राजद्वाराच्च गोष्ठाच्च मृदमानीय निक्षिपेत् ॥ * अथ सर्वौषधयः *

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम् ॥ सठी चम्पकमुस्ता च सर्वौषधिगणःस्मृतः ॥ * अथ पञ्चपल्लवाः * न्यग्रोधोदुम्बरोऽश्वत्थः चूतप्लक्षस्तथैव च इति ॥ * अथ पञ्चरत्नानि * कनकं कुलिशं मुक्ता पद्मरागं च नीलकम् ॥ एतानि पञ्च रत्नानि सर्वकार्येषु योजयेत् ॥ ❁ प्रकारान्तरम् ❁ वज्रमौक्तिकवैडूर्य्यप्रवालं चेन्द्रनीलकम् ॥ अलाभे सर्वरत्नानां हेम सर्वत्र योजयेत् ॥ इति ॥ ततः कुंकुमादिना भूमौ अष्ट-दलं पद्मं कृत्वा ॥ ओँ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पिपृतान्नोभरीमाभिः। इति भूमिं स्पृष्ट्वा ॥ १ ॥ ॐ ओषधयःसमं
वदन्तुसोमेनसह राज्ञा ॥ यस्मैकृणोतिब्राह्मणस्तठं. राजन्पारया
मसि॥इतिसप्तधान्यं विकिरेत्॥ॐआजिघ्रकलशं मह्यात्वाविशन्त्वि
न्दवः ॥ पुनरूर्ज्जानिवर्त्तस्वसानः सहस्रन्धुक्ष्वोरुधारापयस्वती
पुनर्म्माविशताद्रयिः॥ इति सप्तधान्योपरि कलशं स्थापयेत् ॥ २ ॥
ॐ वरुणस्योत्तम्भनमसिवरुणस्यस्कंभसर्ज्जनीस्थोवरुणस्यऽऋत
सदन्यसिवरुणस्यऽऋतसदनमसिवरुणस्यऽऋतसदनमासीद इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कलशे जलं पूरयेत् ॥ ३ ॥ ॐ त्वां गन्धर्व्वाऽअखनँस्त्वामिन्द्रस्त्वा
म्बृहस्पतिः ॥ त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत इति
गन्धं क्षिपेत्॥ ४ ॥ ॐ याऽओषधीः पूर्व्वा जाता देवेभ्यस्त्रियुगं पुरा ॥
मनैनु बभ्रूणामहꣳ शतं धामानि सप्त च । इति सर्वौषधीः ॥ ५ ॥ ॐ
काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥ एवा नो दूर्व्वे प्रतनु सह
स्रेण शतेन च ॥ इति दूर्वाङ्कुरान् ॥ ६ ॥ ॐ अश्वत्थे वो निषदनं पर्णे-
वो वसतिष्कृता ॥ गोभाजऽइत्किलासथ यत्सनवथ पूरुषम् ॥ इति पञ्च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पल्लवान् ॥ ततः पवित्रं पवित्रेस्थ इति मंत्रेण कलशे क्षिपेत् ॥ ७ ॥
ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानः शर्म्मसप्रथाः
॥ ८ ॥ इति सप्त मृदः । ॐ याः फलिनीर्या ऽअफलाअपुष्पाऽयाश्च
पुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुंचन्त्व ‌ हंसः ॥ इति पूगी-
फलम् ॥ ९ ॥ ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत् ॥ दध
द्रत्नानि दाशुषे ॥ इति पञ्च रत्नानि ॥ १० ॥ हिरण्यगर्भः स
मवर्त्तताग्रे भूतस्य जातः पतिरेक ऽआसीत् ॥ सदाधार पृथिवी-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्द्यामुतेमांकस्मैदेवायहविषाव्विधेमइतिहिरण्यम्॥११॥सुजातोज्यो-
तिषासहशर्म्मव्वरूथमासदत्स्व ÷ ॥ व्वासोऽअग्नेव्विश्वरूपꣳसंव्ययस्
स्वाव्विभावसो॥ इति युग्मवस्त्रेण कलशं वेष्टयेत्॥ १२॥ ॐ पूर्णाद
र्व्विपरापतसुपूर्णापुनरापत ॥ व्वस्नेवव्विक्रीणावहाऽइषमूर्जꣳ शतक्र
तो॥ इति पूर्णपात्रमुपरि न्यसेत्॥१३॥ याः फलिनीरिति कलशो-
परि नारिकेलफलं संस्थाप्य । ॐ तत्वायामि ब्रह्मणाव्वन्दमानस्तदा
शास्तेयजमानोहविर्भि ÷ ॥ अहेडमानोव्वरुणेहबोध्युरुशꣳ समा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्ऽआयुःप्रमोषीः । इति ॥ १४ ॥ अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि ॥ ॐ अपांपतये वरुणाय नमः इति पञ्चोपचारैर्वरुणं सम्पूज्य ॥ ततो गङ्गाद्यावाहनम् ॥ कलाकला हि देवानां दानवानां कलाकलाः ॥ सङ्गृह्य निर्मितो यस्मात्कलशस्तेन कथ्यते ॥ १ ॥ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ॥ मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः

टि० १ गंधः-पुष्पौ धूपदीपौ नैवेद्येति पंचकः ॥ पञ्चोपचारमाख्यातं पूजयेत्तत्वविद्बुधः ॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ २ ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा च मेदिनी । अर्जुनी गोमती चैव चन्द्रभागा सरस्वती ॥ ३ ॥ कावेरी कृष्णवेणा च गङ्गा चैव महानदी ॥ तापी गोदावरी चैव माहेन्द्री नर्मदा तथा ॥ ४ ॥ नदाश्च विविधा जाता नद्यः सर्वास्तथापराः ॥ पृथिव्यांयानि तीर्थानि कलशस्थानि तानि वै ॥ ५ ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥ आयान्तु मम शांत्यर्थं दुरितक्षयकारकाः ॥ ६ ॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अङ्गैश्च सहिताः सर्वे कलशं तु समा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रिता: ॥ ७ ॥ अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ॥ आया
न्तु मम शान्त्यर्थं दुरितक्षयकारकाः ॥ ८ ॥ यजमानः स्वहस्ते
अक्षतान् गृहीत्वा ॥ ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञ
मिमन्तनोत्वरिष्टं यज्ञᳫं समिमन्दधातु ॥ विश्वेदेवासऽइहमादय
न्तामोम्प्रतिष्ठ ॥ कलशे वरुणाद्यावाहितदेवताः सुप्रतिष्ठिता वरदा
भवन्तु ॥ ॐ वरुणाद्यावाहितदेवताभ्यो नमः ॥ विष्णवाद्यावाहितदे-
वताभ्यो नम इति वा ॥ आसनार्थे अक्षतान् समर्पयामि ॥ पादयोः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पाद्यं स० ॥ हस्तयोः अर्घ्यं स० ॥ आचमनं स० ॥ पञ्चामृतस्नानं स० ॥ शुद्धोदकस्नानं स० ॥ स्नानाङ्गाचमनं स० ॥ वस्त्रं स० ॥ आचमनं स० ॥ यज्ञोपवीतं स० ॥ आचमनं स० ॥ उपवस्त्रं स० ॥ आचमनं स० ॥ गन्धं स० अक्षतान्स० ॥ पुष्पमालां स० ॥ नानापरिमलद्रव्याणि स० ॥ धूपं आ० ॥ दीपं द० ॥ हस्तप्रक्षालनम् ॥ नैवेद्यं स० ॥ आचमनीयं स० ॥ मध्ये पानीयं उत्तरापोशनं स० ॥ ताम्बूलं स० ॥ पूगीफलं स० ॥ कृतायाः पूजायाः साद्गुण्यार्थे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्रव्यदक्षिणां स० ॥ आर्तिक्यं स० ॥ मन्त्रपुष्पाञ्जलिं स० ॥ प्रदक्षिणां स० ॥ नमस्कारं स० ॥ अनया पूजया वरुणाद्यावाहितदेवताः प्रीयन्तां न मम ॥ अथ प्रार्थना * देवदानवसंवादेमथ्यमाने महोदधौ ॥ उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ १ ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ॥ त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ २ ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥ सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ ४ ॥ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय ॥ सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥ ५ ॥ पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक ॥ पुण्याहवाचनं यावत्तावत्त्वं सन्निधो भव ॥ ६ ॥ इति कलशप्रार्थना ॥

अथ पुण्याहवाचनम् ॥ अवनिकृतजानुमण्डलः कम-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लमुकुलसदृशमञ्जलिं शिरस्याधायानन्तरं दक्षिणेन पाणिना स्वर्ण-
पूर्णकलशं धारयित्वा आशिषः प्रार्थयेत् ॥७॥ यजमानः-दीर्घा नागा
नद्यो गिरयस्त्रीणि विष्णुपदानि च ॥ तेनायुः प्रमाणेन पुण्यं पुण्याहं
दीर्घमायुरस्तु ॥ विप्राः-अस्तु दीर्घमायुः ॥ ॐ त्रीणि पदा विचक्रमे
विष्णुर्गोपा अदाभ्यः ॥ अतो धर्माणि धारयन् ॥ १ ॥ तेनायुः प्रमा-
णेन पुण्यं पुण्याहं दीर्घमायुरस्तु इति यजमानः ॥ २ ॥ पुण्यं
पुण्याहं दीर्घमायुरस्त्विति द्विजाः ॥ एवं द्विरपरं शिरसि भूमौ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निधाय ॥ यजमानः ब्राह्मणानां हस्ते ॐ शिवा आपः सन्तु इतिजलंदद्यात् ॥ सन्तु शिवा आप इति ब्राह्मणाः । एवं सर्वत्र वचनोत्तरं दद्युः ॥ ३ ॥ यज० सौमनस्यमस्तु इति पुष्पम् ॥ वि० अस्तु सौमनस्यम् ॥ यज० अक्षतं चारिष्टं चास्तु इत्यक्षतान् ॥ विप्राः-अस्त्वक्षतमरिष्टञ्च ॥ यज० गन्धाः पान्तु इति गन्धम् ॥ विप्राः-सुम-

---

१ टि० अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम् ॥ ब्राह्मणानां करे न्यस्ताः शिवा आपो भवन्तु ते ।

२ टि० लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे । सा मे वसतु वै नित्यं सौमनस्यं तथास्तु नः ॥

३ टि० अक्षतं चास्तु मे पुण्यं दीर्घमायुर्यशोबलम् । यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ङ्गल्यं चास्तु ॥ यज० अक्षताः पान्तु ॥ विप्राः-आयुष्यमस्तु ॥ यज० पुष्पाणि पान्तु॥ विप्राः-सौश्रियमस्तु॥ यज० सफलताम्बूलानि पान्तु॥ विप्राः-ऐश्वर्यमस्तु ॥ यज० दक्षिणाःपान्तु ॥ विप्राः-बहु देयं चास्तु ॥ यज० पुनरत्रापः पान्तु॥ वि० स्वर्चितमस्तु ॥ यज० दीर्घमायुः शान्तिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं बहुधनं चायुष्यं चास्तु ॥ विप्राः-तथास्तु ॥ यज० यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते तमहमोङ्कारमादिं कृत्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋग्यजुःसामाथर्वाशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनु-
ज्ञातःपुण्यं पुण्याहं वाचयिष्ये ॥ विप्राः-वाच्यताम् ॥ करोतु
स्वस्ति ते ब्रह्मा स्वस्ति चापि द्विजातयः ॥ सरीसृपाश्च ये
श्रेष्ठास्तेभ्यस्ते स्वस्ति सर्वदा ॥ १ ॥ ययातिर्नहुषश्चैव धुन्धुमारो
भगीरथः ॥ तुभ्यं राजर्षयः सर्वे स्वस्ति कुर्वन्तु नित्यशः ॥ २ ॥
स्वस्ति तेऽस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च ॥ स्वस्त्यस्त्वापाद-
केभ्यश्च सर्वेभ्यः स्वस्ति ते सदा ॥ ३ ॥ स्वाहा स्वधा शची

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चैव स्वस्ति कुर्वन्तु ते सदा ॥ करोतु स्वस्ति वेदादिर्नित्यं तव महा-
मखे ॥ ४ ॥ लक्ष्मीररुन्धती चैव कुरुतां स्वस्ति तेऽनघ ॥ असितो
देवलश्चैव विश्वामित्रस्तथाङ्गिराः ॥ ५ ॥ वशिष्ठः कश्यपश्चैव स्वस्ति
कुर्वन्तु ते सदा ॥ धाता विधाता लोकेशो दिशश्च सदिगीश्वराः ॥६॥
स्वस्ति तेऽद्य प्रयच्छंतु कार्त्तिकेयश्च षण्मुखः ॥ विवस्वान्भगवा-
न्स्वस्ति करोतु तव सर्वदा ॥ ७ ॥ दिग्गजाश्चैव चत्वारः क्षितिश्च
गगनं ग्रहाः ॥ अधस्ताद्धरणीं चासौ नागो धारयते हि यः ॥ ८ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शेषश्च पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु ॥ ॐ द्रविणोदाः पिपीष-
तिजुहोतप्रचंतिष्ठत॥नेष्ट्राहृतुभिंरिष्यत॥१॥सवितात्वां सवानांᳬ
सुवतामग्निर्गृहपंतीनाᳬ सोमो वनस्पतींनाम्॥ बृहस्पतिर्वाचऽइ-
न्द्रोज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रःसत्योवरुणोधर्म्मपतीनाम्॥२॥
नतद्रक्षांᳬसिनपिशाचास्तंरन्तिदेवानामोजं÷प्रथमजᳬह्येतत्॥
योबिभर्तिदाक्षायणᳬहिरंण्यᳬ सदेवेषुं कृणुते दीर्घमायुᳬसमं-
नुष्येषुकृणुतेदीर्घमायुं÷॥ ३ ॥ उच्चातेंजातमन्धंसोदिविसद्भूम्या-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दंदे॥ उग्रर्ठ० शर्म्मंमहिश्रवंः॥ ४ ॥ उपांस्मैगायतानरः पवंमाना
येन्दंवे॥ अभिदेवाँ२॥ ऽइयंक्षते॥५॥ इत्येता ऋचः पुण्याहे ब्रूयात्॥
व्रतजपानियमतपःस्वाध्यायक्रतुशमदमदयादानाविशिष्टानां सर्वेषां
ब्राह्मणानां मनः समाधीयताम् इति यज० ॥ समाहितमनसः स्मः
इति ब्रा०॥ प्रसीदन्तु भवन्तः इति यज०॥ प्रसन्नाः स्मः इति ब्रा०॥
ततो यजमानो ब्रूयात् शान्तिरस्त्वित्यादि॥अस्त्विति द्विजाः॥ वचनं
प्रतिवचनं सर्वत्र दद्युः॥ ॐ शान्तिरस्तु ॥ ॐ पुष्टिरस्तु ॥ ॐ तुष्टि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रस्तु ॥ ॐ वृद्धिरस्तु ॥ ॐ अविघ्नमस्तु ॐ आयुष्यमस्तु ॥ ॐ आरोग्यमस्तु ॥ ॐ शिवमस्तु ॥ ॐ शिवं कर्मास्तु ॥ ॐ कर्मसमृद्धि-रस्तु ॥ ॐ धर्मसमृद्धिरस्तु ॥ ॐ वेदसमृद्धिरस्तु ॥ ॐ शास्त्रसमृद्धिरस्तु ॥ ॐ धनंधान्यसमृद्धिरस्तु ॥ ॐ पुत्रपौत्रसमृद्धिरस्तु ॥ ॐ इष्ट-सम्पदस्तु ॥ बहिः ॐ अरिष्टनिरसनमस्तु ॥ ॐ यत्पापं रोगमशुभमकल्याणं तद्दूरे प्रतिहतमस्तु ॥ अन्तः ॐ यच्छ्रेयस्तदस्तु ॥ ॐ उत्तरे कर्मणि निर्विघ्नमस्तु ॐ उत्तरोत्तरमहरहराभिवृद्धिरस्तु ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यन्ताम्। ॐ तिथिकरण
मुहूर्तनक्षत्रग्रहलग्नसम्पदस्तु ॥ ॐ तिथिकरणमुहूर्त्तनक्षत्रग्रहल
ग्नाधिदेवताः प्रीयन्ताम् ॐ तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे
सलग्ने साधिदैवते प्रीयेताम् ॥ ॐ दुर्गापाञ्चाल्यौ प्रीयेताम्॥ ॐ अग्नि-
पुरोगाः विश्वेदेवाः प्रीयन्ताम्। ॐ इन्द्रपुरोगाः मरुद्गणाः प्रीय-
न्ताम् ॥ ॐ वसिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम् ॥ ॐ माहेश्वरी
पुरोगा उमामातरः प्रीयन्ताम् ॥ ॐ अरुन्धतीपुरोगा एकपत्न्यः

प्र०
३०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रीयन्ताम् ॥ ॐ विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम् ॥ ॐ ब्रह्मपुरोगाः
सर्वे वेदाः प्रीयन्ताम् ॥ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् ॥ ॐ श्रीसरस्वत्यौ
प्रीयेताम् ॥ ॐ श्रद्धामेधे प्रीयेताम् ॥ ॐ भगवती कात्यायनी प्रीयताम्
ॐ भगवती माहेश्वरी प्रीयताम् ॥ ॐ भगवती ऋद्धिकरी प्रीयताम् ॥
ॐ भगवती वृद्धिकरी प्रीयताम् ॥ ॐ भगवती पुष्टिकरी प्रीयताम् ॥
ॐ भगवती तुष्टिकरी प्रीयताम् ॥ ॐ भगवन्तौ विघ्नविनायकौ प्री-
येताम् ॥ ॐ सर्वाः कुलदेवताः प्रीयन्ताम् ॥ ॐ सर्वाः ग्रामदेवताः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रीयन्ताम् ॥ ॐ सर्वा इष्टदेवताः प्रीयन्ताम् ॥ बहिः ॐ हताश्च प्र०
ब्रह्मद्विषः ॥ ॐ हताश्च पारिपन्थिनः ॥ ॐ हताश्च विघ्नकर्त्तारः ॐ
शत्रवः पराभवं यान्तु ॥ ॐ शाम्यन्तु घोराणि ॥ ॐ शाम्यन्तु पापानि ॥
ॐ शाम्यन्त्वीतयः ॥ ॐ शाम्यन्तूपद्रवाः ॥ अन्तः ॥ ॐ शुभानि
वर्धन्ताम् ॥ ॐ शिवा आपः सन्तु ॥ ॐ शिवा ऋतवः सन्तु ॥ ॐ
शिवा ओषधयः सन्तु ॥ ॐ शिवा वनस्पतयः सन्तु ॥ ॐ शिवा
अतिथयः सन्तु ॥ ॐ शिवा अग्नयः सन्तु ॥ ॐ शिवा आहुतयः सन्तु ॥ ३१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ अहोरात्रे शिवे स्याताम् ॥ ॐ निकामेनिकामे नः पर्जन्यो
वर्षतु फलवत्योनऽओषधयःपच्यन्तां योगक्षेमोनः कल्पताम् ॥ १ ॥
ॐ शुक्राङ्गारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहितादित्यपुरो-
गाः सर्वे ग्रहाः प्रीयन्ताम् ॥ ॐ भगवान्नारायणः प्रीयताम् ॥ ॐ
भगवान्पर्जन्यः प्रीयताम् ॥ ॐ भगवान्स्वामी महासेनः प्रीयताम् ।
पुरोनुवाक्यया यत्पुण्यं तदस्तु ॥ याज्यया यत्पुण्यं तदस्तु ॥ वष-
ट्कारेण यत्पुण्यं तदस्तु ॥ प्रातः सूर्योदये यत्पुण्यं तदस्तु ॥ एत-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्काल्याणयुक्तं पुण्यं पुण्याहं वाचयिष्ये इति यजमानः॥ ॐ वाच्य- १०
तामिति ब्राह्मणाः॥ ॐ ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादनकारकम्॥
वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः॥ भो ब्राह्मणाःमया क्रियमा
णस्य अमुकाख्यस्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु इति यज०॥ ॐ
पुण्याहं ब्रा०॥ ॐ अस्य कर्मणः पुण्याऽहं भवन्तो ब्रुवन्तु इति यज०॥
पुण्याहं इति ब्रा०॥ एवं वचनं प्रतिवचनं च त्रिः पठित्वा॥ ॐ
पुनन्तु मा देवजनाः पुनन्तु मनसा धियः॥ पुनन्तु विश्वा भूतानि ३२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जातंवेदꣳपुनीहिमां ॥ पृथिव्यामुद्धृतायां तु यत्कल्याणं पुरा कृतम् ॥
ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः ॥ भो ब्राह्मणाः मया
क्रियमाणस्य अमुकाख्यस्य कर्मणः कल्याणं भवन्तो ब्रुवन्तु ३ ॥
ॐ कल्याणम् ३ ॥ ॐ यथेमांवाचंकल्याणीमावदानिजनेभ्यꣳ ॥
ब्रह्मराजन्याभ्याꣳ शूद्रायचार्यायचस्वायचारणायच ॥ प्रियोदे-
वानांदक्षिणायैदातुरिहभूयासमयम्मेकामꣳ समृध्यतामुपमादोनं
मतु ॥२॥ सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिः कृता ॥ सम्पूर्णा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्र० सुप्रभावा च तामृद्धिं प्रब्रुवन्तु नः ॥ भो ब्राह्मणाः मया क्रियमाणस्य प्र०
३३ अमुकाख्यस्य कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु ३ ॥ ॐ कर्म ऋध्यताम्
३ ॥ ॐ सत्रस्यऋद्धिरस्यगंन्मज्योतिरमृताऽअभूम ॥ दिवं पृथि-
व्याऽअध्यारुहामाविदामदेवान्त्स्वर्ज्योतिः ॥ ३ ॥ स्वस्तिस्तु या
विनाशाख्या पुण्यकल्याणवृद्धिदा ॥ विनायकप्रिया नित्यं तां च
स्वस्तिं ब्रुवन्तु नः॥ भोब्राह्मणाःमया क्रियमाणस्य अमुकाख्यस्यकर्म
णः स्वस्तिभवन्तो ब्रुवन्तु ३॥ ॐ आयुष्मतेस्वस्ति ३॥ अस्मै कर्मणे ३३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वस्ति भवन्तो ब्रुवन्तु इति यज०॥ आयुष्मते स्वस्ति ३ इति ब्रा०॥ ॐ
स्व॒स्ति न॒ऽइन्द्रो॑ वृ॒द्धश्र॑वाः स्व॒स्ति नः॑ पू॒षा वि॒श्ववे॑दाः। स्व॒स्ति न॒स्ता-
र्क्ष्यो॒ऽअरि॑ष्टनेमिः स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ॥४॥ समुद्रमथनाज्जाता
जगदानन्दकारिका॥ हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः॥ भो
ब्राह्मणाः मया क्रियमाणस्य अमुकाख्यस्य कर्मणः श्रीरस्त्विति भव-
न्तो ब्रुवन्तु ३ इति यज०॥ ॐ अस्तु श्रीः ३ इति ब्रा०॥ ॐ श्रीश्च॑ ते ल॒क्ष्मीश्च॒
पत्न्या॑वहोरा॒त्रे पा॒र्श्वे नक्ष॑त्राणि रू॒पम॒श्विनौ॒ व्यात्त॑म्॥ इ॒ष्णन्नि॑षाण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुम्मं ऽइषाणसर्व्वंलोकम्मं ऽइषाण॥५॥ मृकण्डसूनोरायुर्यद्वलोमश-
योस्तथा॥आयुषा तेन संयुक्ता जीवेम शरदः शतम्॥ इति यजमानः॥
शतं जीवन्तु भवन्तः इति ब्रा०॥१॥ ॐ शतमिन्नुशरदोऽअन्तिदेवाय
त्रांनश्चक्काजरसंतनूनाम् ॥ पुत्रासोयत्रपितरोभवन्तिमानोमध्यारीं
रिषतायुर्गन्तोः ॥ शिवगौरीविवाहे या या श्रीरामे नृपात्मजे ॥ धन-
दस्य गृहे या श्रीरस्माकं सास्तु सद्मनि इति यजमानः ॥ ॐ अ-
स्तु श्रीः इति ब्राह्मणाः ॥ १ ॥ ॐ मनसः काममाकूतिंवाचः

ग्र० ३४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सत्यमशीय ॥ पशूना ७ रूपमन्नस्यरसोयशः श्रीःश्रयतां मयि स्वाहा ॥ प्रजापतिर्लोकपालो धाता ब्रह्मा च देवराट् ॥ भगवाञ्छाश्वतो नित्यं नो वै रक्षंतु सर्वतः ॥ ॐ भगवान्प्रजापतिःप्रीयताम् १ ॥ ॐ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्त्वयममुष्यपितासावस्यपिताव्य ७ स्यामपतयो रयीणा ७ स्वाहा ॥ आयुष्मते स्वस्तिमते यजमानाय दाशुषे ॥ श्रिये दत्ताशिषःसन्तु ऋत्विग्भिर्वेदपारगैः इति यजमानः ॥ ॐ आयुष्मते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वस्ति इति ब्राह्मणाः॥१॥ ॐ प्रतिपन्थामपद्महि स्वस्तिगामनेहसम्॥ येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु॥ ॐ स्वस्तिवाचनसमृद्धिरस्तु॥ कृतस्य स्वस्तिवाचनकर्मणः समृद्ध्यर्थं स्वस्तिवाचकेभ्यो ब्राह्मणेभ्य इमां दक्षिणां विभज्य दातुमहमुत्सृजे॥ अथाभिषेकः॥ अभिषेके पत्नी वामतः एकस्मिन्पात्रे वरुणोदकं गृहीत्वाऽविधुराश्चत्वारो ब्राह्मणाः दूर्वाऽम्रपल्लवैः सकुटुम्बं यजमानमभिषिञ्चेयुः। तन्मन्त्राः ॐ पयः पृथिव्यां पयऽओषधीषु पयो दिव्यन्तरिक्षे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पयोधाः ॥ पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ १ ॥ ॐ पंच नद्यः
सरस्वतीमपि यन्ति सस्रोतसः। सरस्वती तु पंचधा सो देशे भवत्सरित् ॥
॥ २ ॥ ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य
ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद
॥ ३ ॥ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ॥ पुनन्तु विश्वा
भूतानि जातवेदः पुनीहि मा ॥ ४ ॥ ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनो
र्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ सरस्वत्यै वाचो यन्तुर्यन्त्रियै दधामि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बृहस्पतेष्ट्वासाम्राज्येनाभिषिञ्चाम्यसौ ॥ ५ ॥ देवस्यत्वासवितुः
प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ॥ सरस्वत्यैवाचोयन्तुर्यन्त्रे-
णाग्नेः साम्राज्येनाभिषिञ्चामि ॥ ६ ॥ देवस्यत्वा सवितुः
प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ॥ अश्विनोर्भैषज्येनतेजसे
ब्रह्मवर्चसायाभिषिञ्चामिसरस्वत्यैभैषज्येनवीर्यायान्नाद्यायाभिषि
ञ्चामीन्द्रस्येन्द्रियेणबलायश्रियैयशसेऽभिषिञ्चामि ॥ ७ ॥ ॐ
विश्वानिदेवसवितर्दुरितानिपरासुव ॥ यद्भद्रन्तन्नऽआसुव ॥ ८ ॥

प्र० ३६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धामच्छदग्निरिन्द्रोब्रह्मादेवोबृहस्पतिः ॥ सचेतसोविश्वेदेवायज्ञं
प्रावन्तुनः शुभे ॥ ९ ॥ त्वंयविष्ठदाशुषोनॄँ:पाहिशृणुधीगिरः ॥
रक्षातोकमुतत्मना ॥ १० ॥ अन्नपतेन्नस्यनोदेह्यनमीवस्यशु-
ष्मिणः । प्रप्रदातारन्तारिषऽऊर्ज्जन्नोधेहिद्विपदेचतुष्पदे ॥ ११ ॥
द्यौः शान्तिरन्तरिक्षꣳ शान्तिःपृथिवीशान्तिरापःशान्तिरोष-
धयःशान्तिः ॥ वनस्पतयःशान्तिर्विश्वेदेवाःशान्तिर्ब्रह्मशान्तिः
८ सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥ १२ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यतोयतः समीहसे ततो नोऽअभयङ्कुरु ॥ शन्नः कुरु प्रजाभ्योऽभयन्नः पशुभ्यः ॥ १३ ॥ अमृताभिषेकोऽस्तु ॥ इति पुण्याहवाचनप्रयोगः ॥

* अथाविघ्नपूजनम् *

अविघ्नो मण्डपश्चैव मातॄणां पूजनं सकृत् ॥ वैश्वदेवं वसोर्द्धारा नान्दीश्राद्धमतःपरम् ॥ विवाहोपनयनचूडाकरणसीमन्तोन्नयनादौ ॥ मोदश्चैव प्रमोदश्च सुमुखो दुर्मुखस्तथा ॥ अविघ्नो विघ्नहर्त्ता च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षडेते विघ्ननायकाः । ॐ मोदाय नमः मोदं आ० । ॐ प्रमोदाय० प्रमोदं आ० । ॐ सुमुखाय० सुमुखं आ० । ॐ दुर्मुखाय० दुर्मुखं आ० ॐ अविघ्नाय० अविघ्नं आ० । ॐ विघ्नहर्त्रे० विघ्नहर्तारं० । ॐ मोदादिषड्विनायकेभ्यो नमः इति पूजयेत्॥ इति अविघ्नपूजनम् ॥

❀ अथ मण्डपदेवताप्रतिष्ठा ❀

ततो मण्डपार्थं स्तम्भारोपणम् । तद्यथा ॐ देवस्यं-त्वासवितुः प्रंसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्॥ इत्यभ्रिमादत्ते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ओ॑म् इ॒दम॒ह१ꣳ रक्ष॑सां ग्री॒वा अपि॑ कृन्तामि । इत्यवटं परिलिखति ।
ओ॑म् मा वो॑ रिषत्खनि॒ता यस्मै॑ चा॒हं खना॑मि वः ॥ द्वि॒पाच्चतु॑ष्पाद॒स्मा-
क१ꣳ सर्व॑मस्त्वनातुरम् ॥ इति खनति । ओ॑म् सि॒ञ्चन्ति॒ परि॑ षिञ्च॒न्त्यु-
त्सि॑ञ्चन्ति पु॒नन्ति च ॥ सुरा॑यै ब॒भ्र्वै मदे॑ कि॒न्त्वो व॑दति कि॒न्त्वः ॥ इति
तस्मिन्नवटे अप आसिञ्चति ॥ ओ॑म् यवो॑ऽसि य॒वया॒स्मद्द्वेषो॑ य॒वया-
राती॑ः ॥ इति यवानावपति ॥ दर्भसिद्धार्थकांस्तूष्णीमावपति ॥ ओ॑म्
काण्डा॑त्काण्डात्प्र॒रोह॑न्ती॒ परु॑षः परुष॒स्परि॑ ॥ ए॒वा नो॑ दूर्वे॒ प्र त॑-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नुसहस्रेण शतेन च ॥ इति दूर्वाङ्कुरान् । ॐ दधिक्राव्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः ॥ सुरभिनो मुखाकरत्प्रणऽआयूंषि तारिषत् ॥ इति दधि ॥ ॐ याः फलिनीर्याऽअफलाऽअपुष्पायाश्च पुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानो मुञ्चन्त्वंहसः ॥ इति फलम् । ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ॥ सदाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम । इति हिरण्यं चावपति । ॐ उच्छ्रयस्व वनस्पत ऊर्ध्वो मा पाह्यंहसऽआस्य यज्ञ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्योद्दृचः॥ इति मन्त्रेण रक्तसूत्रबद्धमदनफलसमन्वितस्तम्भोत्था-
पनम्। ॐ ऊर्ध्वऽऊषुणऽऊतये तिष्ठा देवो न सविता ॥ ऊर्द्ध्वो वाजस्य
सनिता यदञ्जिभिर्व्वाघद्भिर्व्विह्वयामहे ॥ इत्यवटे रोपणम् ॥ ॐ स्थिरो
भव वीड्वङ्गऽआशुर्भव वाज्यर्वन् ॥ पृथुर्भव सुषदस्त्वमग्नेः पुरी
षवाहणः ॥ इति समन्ततो मृत्पूर्णेन स्थिरीकरणम् ॥ एवं सर्वान्स्त-
म्भान्स्थिरीकृत्य ॥ सर्वेषु स्तम्भेषु रोपणक्रमेणैकैकं देवमावाहयेत्।
तद्यथा ॥ ॐ नलिन्यै नमः नलिनीमा०॥१॥ ॐ नन्दिन्यै० नंदिनी-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मा० ॥२॥ ॐ मैत्रायै० मैत्रामा० ॥ ३ ॥ ॐ उमायै० उमामा० ॥ ४ ॥
ॐ पशुवर्द्धिन्यै० पशुवर्द्धिनी० ॥ ५ ॥ ॐ मनो जूतिर्जुषतामाज्ज्यस्य
बृहस्पतिर्यज्ञमिमंतनोत्वरिष्टं यज्ञꣳ० समिमन्दधातु ॥ विश्वेदेवा-
संऽइहमादयन्तामो३म्प्रतिष्ठ। मण्डपदेवताः सुप्रतिष्ठिता वरदा भव-
न्तु इति प्रतिष्ठाप्य ॥ ॐ मण्डपदेवताभ्यो नमः इति षोडशोपचारै-
रभ्यर्चनम्। मण्डपदेवताप्रीत्यर्थं यथाशक्ति ब्राह्मणान्भोजयिष्ये ॥
अत्र शिष्टाचार एव शरणम्। मण्डपप्रतिष्ठा तु सीमन्तोन्नयनान्नप्रा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शनचूडाकरणोपनयनवेदारम्भकेशान्तव्रतविसर्गविवाहेषु कार्या ॥
तत्रैव मण्डपार्थं स्तम्भनिवेशनं तु ॥ वृषाद्राशित्रये सूर्ये सति आ-
ग्नेय्यां कार्यम्। सिंहाद्राशित्रये ईशान्याम्॥ वृश्चिकाद्राशित्रये वाय-
व्याम्॥ कुम्भाद्राशित्रये नैर्ऋत्याम्॥ इति मण्डपदेवताप्रतिष्ठा॥

* अथ मातृकापूजनम् *

अथाग्नेय्यां प्रतिमास्वक्षतपुञ्जेषु वा प्राक्संस्थमुदक्संस्थं वा पीठो-
परिमातृस्थापनम्॥ तद्यथा॥ समीपे मातृवर्गस्य सर्वविघ्नहरं सदा॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रैलोक्यवन्दितं देवं गणेशं स्थापयाम्यहम् ॥ ॐ गुणानान्त्वा गुण
पंतिꣳ हवामहेप्रियाणान्त्वाप्रियपंतिꣳ हवामहेनिधीनान्त्वां
निधिपतिंꣳ हवामहे वसोमम ॥ आहमंजानिगर्भधमा त्वमं
जासिगर्भधंम् । ॐ भूर्भुवः स्वः गणपतये० गणपतिमावाह-
यामि स्थापयामि ॥ १ ॥ हेमाद्रितनयां देवीं वरदां शङ्करप्रियाम् ॥
लम्बोदरस्य जननीं गौरीमावाहयाम्यहम् ॥ ॐ आयङ्गौः पृश्निर-
क्रमीदसंदन्मातरंम्पुरः ॥ पितरंञ्च प्रयन्त्स्वः ॥ ॐ भूर्भुवः स्वः गौर्यै

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः गौरीमावाह० ॥ २ ॥ पद्माभां पद्मवदनां पद्मनाभोरुसंस्थि-
ताम् ॥ जगत्प्रियां पद्मवासां पद्मामावाहयाम्यहम् ॥ ॐ हिरण्यरूपा-
ऽउषसोव्विरोकऽउभाविन्द्राऽउदिथꣳ सूर्य्यश्च ॥ आरोहतं व्वरुण-
मित्रगर्त्तन्ततश्चक्षाथामादितिन्दितिञ्च मित्रोसि व्वरुणोसि ॥ ॐ
पद्मायै० पद्मामा० ॥ ३ ॥ दिव्यरूपां विशालाक्षीं शुचिकुण्डलधा-
रिणीम् ॥ रक्तमुक्ताद्यलङ्कारां शचीमावाहयाम्यहम् ॥ ॐ निवेशनꣳ
सङ्गमनोव्वसूनांव्विश्वारूपाभिचष्टेशचीभिꣳ ॥ देवऽइवसवितासत्य-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धर्म्मेन्द्रोनतंस्थौसमरेपंथीनाम् ॥ ॐ शच्यै० शचीमा० ॥ ४ ॥
विश्वेऽस्मिन् भूरिवरदां जरां निर्जरसेविताम् ॥ बुद्धिप्रबोधिनीं
सौम्यां मेधामावाहयाम्यहम् ॥ ॐ मेधाम्मेव्वरुंणोददातुमेधामग्निः
प्रजापंतिः ॥ मेधामिन्द्रंश्चव्वायुंश्चमेधान्धातादंदातुमेस्वाहां ॥ ॐ
मेधायै० मेधामा० ॥ ५ ॥ जगत्सृष्टिकरीं धात्रीं देवीं प्रणवमातृ-
काम् ॥ वेदगर्भां यज्ञमयीं सावित्रीं स्थापयाम्यहम् ॐ सवितात्त्वां
सवानां ॐ सुवतामग्निर्ग्गृहपंतीना ॐ सोमोव्वनस्पतींनाम् ॥ बृह-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्र० स्पतिर्व्वाचऽइन्द्रोज्यैष्ठ्यांयरुद्रः पशुभ्योमित्रः सत्योव्वरुणोध- प्र०
४२ र्म्मपतीनाम् ॥ ॐ सावित्र्यै० सावित्रीमा० ॥ ६ ॥ सर्वास्त्रधारिणीं
देवीं सर्वाभरणभूषिताम् ॥ सर्वदेवस्तुतां वन्द्यां विजयां स्थापया-
म्यहम् ॥ ॐ व्विज्ज्यन्धनुः कपर्दिनोव्विशंल्योबाणवाँ२॥ ऽउत ॥
अनैशन्नस्ययाऽइषवऽआभुरंस्यनिषङ्गधिः ॐ विजयायै० विज-
या० ॥ ७ ॥ सुरारिमथिनीं देवीं देवानामभयप्रदाम् ॥ त्रैलोक्यवं-
दितां शुभ्रां जयामावाहयाम्यहम् ॥ ॐ बह्वीनाम्पिताबहुरंस्य ४२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुत्रऽइश्विऽइश्वाकृणोतिसमनावगत्यं ॥ इषुधिःसङ्काःपृतनाश्च
सर्व्वाः पृष्ठेनिनंद्धोजयतिप्रसूतः ॐ जयायै० जयामा० ॥ ८ ॥
मयूरवाहनां देवीं खड्गशक्तिधनुर्धराम् ॥ आवाहयेद्देवसेनां तारका
सुरमर्द्दिनीम् ॥ ॐ इन्द्रंऽआसान्नेताबृहस्पतिर्द्दक्षिणा यज्ञःपुरएं-
तुसोमः ॥ देवसेनानांमभिभञ्जतीनाञ्जयंन्तीनाम्मरुतोयन्त्वग्ग्रं-
म् ॥ ॐ देवसेनायै० देवसेनामा० ॥ ९ ॥ अग्रजा सर्वदेवानां
कव्यार्थं या प्रतिष्ठिता ॥ पितॄणां तृप्तिदां देवीं स्वधामावाहयाम्य-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्र० हम् ॥ ॐ पितृभ्यंः स्वधायिभ्यंः स्वधानमंः पितामहेभ्यंः स्वधा- प्र०
४३ यिभ्यंः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यंः स्वधानमंः ॥
अक्षन्न्पितरोमीमदन्तपितरोतीतृपन्त पितरः पितरः शुन्धध्वम् ॥
ॐ स्वधायै० स्वधामा० ॥ १० ॥ हविर्गृहीत्वा सततं देवेभ्यो या
प्रयच्छति ॥ तां दिव्यरूपां वरदां स्वाहामावाहयाम्यहम् ॥ ॐ स्वाहां
प्राणेभ्यः साधिपतिकेभ्यः ॥ पृथिव्यैस्वाहाग्नयेस्वाहान्तरिक्षाय
स्वाहांव्वायवेस्वाहां ॥ दिवेस्स्वाहासूर्य्यायस्वाहां ॥ ॐ स्वाहायै० ४३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वाहामा० ॥ ११ ॥ आवाहयाम्यहं मातृः सकला लोकपूजिताः ॥
सर्वकल्याणरूपिण्यो वरदा दिव्यभूषणाः ॥ ॐ आपोऽअस्मान्मा
तरंः शुन्धयन्तु घृतेनं नो घृतप्वंः पुनन्तु ॥ विश्वꣳ हिरिप्रम्प्रव
हन्तिदेवीरुदिदांभ्युहंशुचिरापूतऽएंमि ॥ दीक्षातपसोस्तनूरंसिता
न्त्वांशिवाꣳशग्मांम्परिंदधेभद्रंवर्णंपुष्यंन् ॥ ॐ मातृभ्यो० मातृ०ः
॥ १२ ॥ आवाहयेल्लोकमातृर्जयन्तीप्रमुखाः शुभाः ॥ नानाभीष्ट
प्रदाः शान्ताः सर्वलोकहितावहाः ॥ ॐ रयिश्चंमेरायंश्चमेपुष्टञ्चंमे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्टिंश्चमेव्विभुचंमेप्रभुचंमेपूर्णञ्चमेपूर्णतरञ्चमेकुयवञ्चमेक्षितञ्चमे
न्नंञ्चमेक्षुच्चंमेयज्ञेनंकल्पन्ताम् ॥ ॐ लोकमातृभ्यो० लोकमातृः०
॥ १३ ॥ सर्वहर्षकरीं देवीं भक्तानामभयप्रदाम् ॥ हर्षोत्फुल्लास्य-
कमलां धृतिमावाहयाम्यहम् ॥ ॐ यत्प्रज्ञानंमुतचेतोधृतिंश्चयज्ज्यो
तिंरन्तरमृतंम्प्रजासु ॥ यस्मान्नऽऋतेकिञ्चनकर्म्मंक्क्रियतेतन्मेमनः
शिवसङ्कल्पमस्तु ॥ ॐ धृत्यै० धृतिमा० ॥ १४ ॥ पोषयन्तीं जग
त्सर्वंस्वदेहप्रभवैर्नवैः ॥ शाकैः फलैर्जलैरत्नैः पुष्टिमावाहयाम्यहम् ॥

ग्र० ४४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ अङ्गान्न्यात्मन्न्भिषजातदश्विनात्मानमङ्गै ँ समधात्सरस्वती ॥ इन्द्रस्यरूपर्ठ० शतमानमायुश्चन्द्रेणज्ज्योतिरमृतन्दधानाः ॥ ॐ पुष्ट्यै० पुष्टि० ॥ १५ ॥ देवैराराधितां देवीं सदा संतोषकारिणीम् ॥ प्रसादसुमुखीं देवीं तुष्टिमावाहयाम्यहम् ॥ ॐ जातवेदसे सुनवाम सोममरातीयतो निदहातिवेदः ॥ सनः पर्षदातिदुर्गाणि विश्वानावेवसिन्धुन्दुरितात्यग्निः ॥ ॐ तुष्ट्यै० तुष्टि० ॥ १६ ॥ पत्तने नगरे ग्रामे विपिने पर्वते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्र० गृहे ॥ नानाजातिकुलेशानीं दुर्गामावाहयाम्यहम् ॥ ॐ प्राणाय प्र०
४५ स्वाहापानायस्वाहा व्यानायस्वाहा चक्षुषेस्वाहाश्रोत्रायस्वाहाव्वा
चेस्वाहामनसेस्वाहा ॥ ॐ आत्मनः कुलदेवतायै० आत्मनः कुलदे-
वतामा० ॥ १७ ॥ ॐ मनोजूतिर्जुषतामाज्ज्यस्य बृहस्पतिर्यज्ञमिमं
तंनोत्वरिष्टंयज्ञꣳ समिमन्दधातु ॥ व्विश्वेदेवा संऽइहमादयन्तामों ३
प्रतिष्ठ ॥ गौर्याद्याः कुलदेवतान्तमातरो गणपतिसहिताः सुप्रतिष्ठिताः
वरदाः भवन्तु ॥ गौरी पद्मा शची मेधा सावित्री विजया जया ॥ ४५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ १ ॥ धृतिः पुष्टिस्तथा तुष्टिः आत्मनः कुलदेवताः ॥ गणेशेनाधिका ह्येता वृद्धौ पूज्यास्तु षोडश ॥ २ ॥ ॐ गणपत्यादिकुलदेवतान्तमातृभ्यो नमः इत्यभ्यर्चनम् ॥ चूडाकरणोपनयनविवाहेषु यथाकुलाचारं मातृ-भाण्डस्थापनम् ॥

अथ वसोर्द्धारापूजनम् ॥ आग्नेय्यां भित्तौ कुंकुमादिना बिन्दु-करणेनालंकरणं कृत्वाऽगामिमन्त्रं पठन् घृतेन सप्तधाराः प्राक्संस्था

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उदक्संस्था वा कुर्यात् ॥ वसोꣳपवित्रंमासि शतधारं वसोꣳपवित्रं-
मासि सहस्रंधारम् ॥ देवस्त्वांसवितापुंनातुवसोꣳपवित्रेंणशतधांरेण
सुप्वा ॥ इति मन्त्रेण वसोर्द्धारा: कर्तव्या:॥ ॐकामंधुक्षꣳइत्येतावता
मन्त्रेण धारामर्धभागेन गुडेनैकीकरणम् । प्रतिधारामेकैकदेवतामा-
वाहयेत् ॥ ॐ मनंसꣳकाममाकूंतिंवाचꣳसत्यमंशीय ॥ पशू
नाꣳरूपमन्नंस्यरसोयशꣳश्री: श्रंयतां मयिस्वाहां ॐ श्रियै नम:
श्रियमा० ॥ १ ॥ ॐ श्रीश्चंतेलक्ष्मीश्च पत्न्यांवहोरात्रेपार्श्वेंनक्ष

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्राणि रूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मंऽइषाण सर्व्वलोक
म्मंऽइषाण ॥ ॐ लक्ष्म्यै न० लक्ष्मीमा० ॥ २ ॥ ॐ भद्रं कर्णोभिः
शृणुयामदेवाभद्रंपश्येमा क्षभिर्य्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाᳬ
संस्तनूभिर्व्यशेमहिदेवहितंयदायुः ॥ ॐ धृत्यै० धृतिमा० ॥ ३ ॥
ॐ मेधाम्मेव्वरुणोददातुमेधामग्निः प्रजापतिः ॥ मेधामिन्द्रं
श्चवायुश्चं मेधान्धातादंदातुमेस्वाहां ॐ मेधायै० मेधामा० ॥ ४ ॥
ॐ प्राणायस्वाहांपानायस्वाहां व्यानायस्वाहा चक्षुषेस्वाहा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्र० श्रोत्रांयस्वाहां व्वाचेस्वाहा मनंसेस्वाहां ॥ ॐ स्वाहायै० स्वाहा० प्र०
४७ ॥५॥ॐ आयङ्गौःपृश्निरक्रमीदसंदन्मातरंम्पुरः॥पितरंञ्चप्रयन्त्स्वः
ॐ प्रज्ञायै० प्रज्ञा० ॥ ६ ॥ ॐ पावकानꣳ सरंस्वती व्वाजेभि
र्व्वाजिनींवती यज्ञंव्वंष्टुधियावंसुꣳ ॥ ॐ सरस्वत्यै० सरस्वतीमा०
॥ ७ ॥ ॐ श्रीर्लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती ॥ माङ्गल्येषु
प्रपूज्यन्ते सप्तैता घृतमातरः इति मन्त्रेण वा ॥ ॐ वसोर्धारादेवता-
भ्यो नमः इत्यावाह्य ॥ ॐ मनो० वसोर्द्धारादेवताः सुप्रतिष्ठिताः ४७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वरदाः भवन्तु ॥ सम्पूज्य प्रार्थयेत् ॥ यदङ्गत्वेन भो देव्यः पूजिता
विधिमार्गतः ॥ कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम् ॥ अन-
या पूजया वसोर्द्धारादेवताः प्रीयन्ताम् ॥ इति वसोर्द्धाराकरणम् ॥
आयुष्यमन्त्रजपः ॥ यदायुष्यं चिरं देवाः सप्तकल्पान्तजीविषु ॥
ददुस्तेनायुषा युक्ता जीवेम शरदः शतम् ॥ दीर्घा नागा नगा नद्योऽ
नन्ताः सप्तार्णवा दिशः ॥ अनन्तेनायुषा तेन जीवेम शरदः शतम् ॥
सत्यानि पञ्चभूतानि विनाशरहितानि च ॥ अविनाश्यायुषा तद्वज्जी-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वेम शरदः शतम् ॥ ॐ आयुष्यंवर्चस्यꣳ रायस्पोषमौद्भिदम्
इदꣳ हिरण्यंवर्च्चस्वज्जैत्रायाविशतादुमाम् ॥ न तद्रक्षाꣳसि
नपिशाचास्तरन्तिदेवानामोजः प्रथमजꣳह्येतत् ॥ सोबिभर्तिदा-
क्षायणꣳ हिरण्यꣳ सदेवेषुकृणुते दीर्घमायुꣳसमनुष्येषुकृणुतेदीर्घ
मायुः॥ यदाबध्नंदाक्षायणाहिरण्यꣳशतानीकायसुमनस्यमानाः॥
तन्मऽआबध्नामिशतशारदायायुष्मान् जरदष्टिर्यथासम् ॥ इत्या
युष्यमन्त्रजपः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

अथ सांकल्पेन विधिनां नान्दीश्राद्धप्रयोगः ॥

सव्येन[2] सर्वं कार्यम् ॥ ऋजव एव कुशास्तिलस्थाने यवा दातव्याः॥ ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ॥ ॐ मातृपितामहीप्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं

टि० १ भविष्यपुराणे—"पिण्डनिर्वपणं कुर्य्यर्मान्न वा कुर्य्यान्नराधिप ॥ वृद्धिश्राद्धे महावाहो कुलधर्म्मानवेक्ष्य हि" ॥

टि० २ अनस्मद्वृद्धशब्दानामरूपाणामगोत्रिणाम् ॥ अनाम्नामतिलाद्यैश्च नान्दीश्राद्धं च सव्यवत्" ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पादप्रक्षालनं वृद्धिः । ॐ पितृपितामहप्रपितामहाः नान्दीमुखाः
ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ॥ ॐ
मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ
भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ॥

आसनदानम् । सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ
भूर्भुवः स्वः इमे आसने वो नमोनमः नान्दीश्राद्धेक्षणौ क्रियेतां यथा
प्राप्नुवन्तो भवन्तः तथाप्राप्नुवामः ॐ मातृपितामहीप्रपितामह्यः

प्र०
४९.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नान्दीमुख्यः ॐ भूर्भुवः स्वः इमे आसने वो नमोनमः नान्दीश्राद्धे क्षणौ क्रियेतां यथा प्राप्नुवन्त्यो भवन्त्यः तथा प्राप्नुवामः॥ ॐ पितृ-पितामहप्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इमे आसने वो नमो नमः नान्दीश्राद्धेक्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः ॥ ॐ मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवःस्वः इमे आसने वो नमो नमः नान्दी श्राद्धे-क्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततो गन्धादिदानम् ॥ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ॥ ॐ मातृपितामहीप्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ॥ ॐ पितृपितामहप्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ॥ ॐ मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भोजनंनिष्क्रयदानम्॥ ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः॥ ॐ मातृपितामहीप्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः। ॐ पितृपितामहप्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्म-

१ टि० नान्दीश्राद्धे अन्नाभावे आमं आमाभावे हिरण्यं हिरण्याभावे युग्मब्राह्मणभोजनपर्याप्तान्ननिष्क्रयीभूतयथाशक्ति किंचिद् द्रव्यदानम्। इति धर्मसिंधौ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा
सम्पद्यतां वृद्धिः ॥ ॐ मातामहप्रमातामहवृद्धप्रमातामहाः सप-
त्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्या-
प्तामान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतांवृद्धिः ।

सक्षीरय[1]वमुदकदानम् ॥ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दी
मुखाः प्रीयन्ताम् ॥ मातृपितामहीप्रपितामह्यः नान्दीमुख्यः प्रीय-
न्ताम् ॥ पितृपितामहप्रपितामहाः नान्दीमुखाः प्रीयन्ताम् । माता-

१ टि०पु ब्रह्माण्डराणे ॥ तथाक्षय्योदकस्थाने दद्यात् क्षीरयवोदकम् इति ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः प्रीय-
न्ताम् ॥ शिवा आपः सन्तु इति जलम् ॥ सौमनस्यमस्तु इति पुष्प-
म् ॥ अक्षतं चारिष्टञ्चास्तु इत्यक्षतान् ॥ अघोराः पितरः सन्तु ॥ इति
पूर्वाग्रां जलधारां दद्यात् इति समाचारः ॥ केवलपाठमात्रं ॥ ततः
कृतांजलिः प्रार्थयेत् ॥ य० ॐ गोत्रन्नो वर्धतां दातारो नोऽभिवर्ध-
न्तां वेदाः सन्ततिरेवच ॥ श्रद्धा च नो मा व्यगमद्बहु देयं च नोऽस्तु
अन्नं च नो बहु भवेदातिथींश्च लभेमहि ॥ याचितारश्च नः सन्तु मा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

च याचिष्म कञ्चन ॥ एताः सत्या आशिषः सन्तु ॥ ब्रा० सन्त्वेताः सत्या आशिष इति ॥

दक्षिणादानम् ॥ ॐ सत्य वसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षा[1]म-[2]लक[3]यव[4]मूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे ॥ ॐ मा[5]तृपिताम-

---

टि० १ मुनक्का २ आँवला । ३ यव । ४ अदरखमूल इत्यादि । ५ माता पितामही चैव तथैव प्रपितामही ॥ पिता पितामहश्चैव तथैव प्रपितामहः ॥ मातामहस्तत्पिता च प्रमातामहकादयः । एते भवन्तु सुप्रीताः प्रयच्छन्तु च मङ्गलम् ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हीप्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयिणी दक्षिणां दातुमहमुत्सृजे॥ ॐ पितृपितामहप्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थंद्राक्षामलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे॥ ॐ मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्यफलप्रतिष्ठासिद्ध्यर्थंद्राक्षामलकयवमूलनिष्क्रयिणी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

दक्षिणांदातुमहमुत्सृजे ॥ ॐ उपांस्मैगायतानरꣳपवंमानायेन्दंवे ॥
अभिदेवाँऽइयं क्षते ॥ इडांमग्नेपुरुदꣳ संꣳ सनिंगोःशंश्ववत्तमꣳ हवं-
मानायसाधं॥ स्यान्नंःसूनुस्तनंयोविजावाग्नेसातेंसुमति भूंत्वस्मे ॥
य० अनेन नांदीश्राद्धं संपन्नम् । ब्रा० सुसंपन्नम् । वाजे वाजे इति वि-
सृज्य ॐ वाजेंवाजेवतवाजिनोनोधनेंषुविप्राऽअमृताऽऋतज्ञाꣳ ॥
अस्य मध्वंःपिबतमादयंध्वं तृप्तायांतपथिभिंर्देवयानैंꣳ ॥ आमावा-

१ टि० अनेन मंत्रेण केचिदर्घदानं कुर्वन्ति केचित्तु पाठमात्रं कुर्वन्ति ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जस्येत्यनुवृज्य ॥ ॐ आमावाजंस्य प्रसवोजंगम्यादेमेद्यावांपृथिवी विश्वरूंपे ॥ आमांगन्तांपितरांमातराचामा सोमोऽअमृतत्वेनं गम्यात् ॥ विश्वेदेवाः प्रीयंन्तामिति विसृज्य ॥ य० मयाचरिते सांकल्पिकनान्दीश्राद्धे न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनाच्छ्रीगणेशप्रसादात्परिपूर्णोऽस्तु । ब्रा० अस्तुपरिपूर्णः इति नान्दीश्राद्धप्रयोगः ॥

अथाचार्यादिवरणम् ॥ उदङ्मुखमाचार्यमुपवेश्य गन्धादिभिः

१ टि० प्रीयन्तामित्यत्र यवक्षीरजलानि दद्यादिति प्रयोगरत्नगदाधरौ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संपूज्य॥ ॐ अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः अमुकशर्माऽहं
अमुकगोत्रोत्पन्नममुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गतवाजसने-
यमाध्यंदिनीयशाखाध्यायिनममुकशर्माणंब्राह्मणमस्मिन्ग्रहशां-
त्याख्ये(वा अमुकाख्ये)कर्मणि एभिर्वरणद्रव्यैःआचार्यत्वेन त्वामहं
वृणे इतियजमानः॥ वृतोऽस्मि इति विप्रप्रतिवचनम् ॥य०॥ आचा-
र्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः॥ तथा त्वं मम यज्ञेऽस्मिन्ना-
चार्यो भव सुव्रत॥ १॥ अस्मिन् ग्रहशांत्याख्ये (अमुकाख्ये वा)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्माणि एभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं ब्राह्मणं ब्रह्मत्वेन त्वामहं वृणे ॥ वि० ॥ वृतोऽस्मि ॥ य० ॥ यथा चतुर्मुखो ब्रह्मा सर्वलोकपितामहः ॥ तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ॥ २ ॥

अस्मिन् ग्रहशान्त्याख्ये कर्माणि एभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं ब्राह्मणं सदस्यत्वेन त्वामहं वृणे ॥ वि० ॥ वृतोऽस्मि ॥ य० ॥ भगवन्सर्वधर्मज्ञ सर्वधर्मभृतां वर ॥ वितते मम यज्ञेऽस्मिन्सदस्यो

१० भव सुव्रत ॥ ३ ॥ अस्मिन् ग्रहशान्त्याख्ये कर्माणि एभिर्वरणद्रव्यै-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रमुकगोत्रममुकशर्माणं ब्राह्मणं गाणपत्यत्वेन त्वामहं वृणे ॥ वि० ॥
वृतोऽस्मि ॥ य० ॥ वांछितार्थफलावाप्त्यै पूजितोऽसि सुरासुरैः ॥
निर्विघ्नं क्रतुसंसिद्ध्यै त्वामहं गणपं वृणे ॥ ४ ॥ अस्मिन् ग्रहशा-
न्त्याख्ये कर्मणि एभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं ब्राह्मणं
उपद्रष्टृत्वेन त्वामहं वृणे ॥ वि० ॥ वृतोऽस्मि ॥ य० ॥ भगवन्सर्वध-
र्मज्ञ सर्वधर्मपरायण ॥ वितते मम यज्ञेऽस्मिन्नुपद्रष्टा भव द्विज ॥५॥
अस्मिन् ग्रहशांत्याख्ये कर्मणि एभिर्वरणद्रव्यैरमुकगोत्रममुकश-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्माणं ब्राह्मणं ऋत्विक्त्वेन त्वामहं वृणे। वि० ॥ वृतोऽस्मि ॥ य० ॥
भगवन्सर्वधर्मज्ञ सर्वधर्मपरायण। वितते मम यज्ञेऽस्मिन्नृत्विक्
त्वम्मे मखे भव ॥ ६ ॥ वि० ॥ ॐ व्रतेनं दीक्षामाप्नोति दीक्षयाप्नोति-
दक्षिणाम् ॥ दक्षिणा श्रद्धामाप्नोति श्रद्धयासत्यमाप्यते ॥ अथ य०
करसंपुटं कृत्वा सर्वान् प्रार्थयेत् ॥ अस्मिन्कर्मणि ये ये तु वृता गुरु-
मुखादयः ॥ सावधानाः प्रकुर्वन्तु स्वं स्वं कर्म यथोदितम् ॥ अस्य
यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया ॥ सुप्रसन्नैः प्रकर्तव्यं कर्मेदं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

ग्र० विधिपूर्वकम् ॥ यथाविहितं कर्म कुरु (एकतन्त्रपक्षे कुरुध्वम्) ॥ ग्र०
५६ वि० ॥ यथाज्ञानं करवाणि (करवामः) ॥ इत्याचार्यादिवरणम् ॥

आचार्यः आचम्य प्राणानायम्य ॥ देशकालौ संकीर्त्य अस्मिन् ग्रहशांत्याख्ये कर्मणि यजमानेन वृतोऽहं आचार्यकर्म करिष्ये। आचार्यो वामहस्ते गौरसर्षपान् गृहीत्वा दिग्रक्षणं कुर्यात्। तत्र मंत्राः। रक्षोहणंव्वलगहनंव्वैष्णवीमिदमहं तंव्वलगमुत्किरामियम्मे
निष्ट्यो यममात्योनिचखानेदमहंतंव्वलगमुत्किरामियम्मेसमानो- ५६

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यमसंमानो निचखानेदमहंतंव्वंलगमुत्किरामि यम्मेसबन्धुर्यमसं-
बन्धुर्न्निचखानेदमहंतंव्वंलगमुत्किरामि यम्मेंसजातोयमसंजातो
निचखानोत्कृत्याङ्किरामि ॥१॥ रक्षोहणो वो व्वलगहनꣳ प्रोक्षामि
व्वैष्णवान्न्रक्षोहणोवोव्वलगहनोवंनयामिव्वैष्णवान्न्रक्षोहणोवोव्वल-
गहनोवंस्तृणामिव्वैष्णवान्न्रक्षोहणौवांव्वलगहनाऽउपंदधामिव्वैष्ण-
वीरक्षोहणौवां व्वलगहनौपर्यूँहामिव्वैष्णवीव्वैष्णवमसिव्वैष्णवास्थ
॥२॥ रक्षसां भागोसि निरस्तꣳरक्षऽइदमहꣳ रक्षोभितिष्ठामीदमहꣳ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रक्षो बंबाधऽइदमहꣳ रक्षोंऽधमन्तमोंनयामि ॥ घृतेनंद्यावापृथिवी
प्रोर्णुवाथांद्वायोव्वेस्तोकानांमग्निराज्यंस्यव्वेतु स्वाहा स्वाहांकृतेऽ
ऊर्ध्वंनंभसंमारुतंगंच्छतम् ॥ ३ ॥ रक्षोहाव्विश्वचंर्षणिरभियोनिम
योंहते ॥ द्रोणेंसधस्थमासंदत् ॥ ४ ॥ यदत्र संस्थितं भूतं स्थानमा-
श्रित्य सर्वदा ॥ स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु
॥ १ ॥ अपसर्पंतु ते भूता ये भूता भूमिसंस्थिताः ॥ ये भूता विघ्न-
कर्तारस्ते नश्यंतु शिवाज्ञया ॥ २ ॥ अपक्रामंतु भूतानि पिशाचास्स-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्वतो दिशम् ॥ सर्वेषामविरोधेन शांतिकर्म समारभे ॥ ३ ॥ भूतानि राक्षसा वापि येऽत्र तिष्ठन्ति केचन ॥ ते सर्वेऽप्यपगच्छन्तु ग्रहयागं करोम्यहम् ॥४॥ इति तिष्ठन् पूर्वादिदिक्षु विकिरेत् ॥ उदकोपस्पर्शः ।

ततः पञ्चगव्यकरणम् ॥ गायत्र्या गोमूत्रम् । ॐ तत्सं० ॥ गंधद्वारेति गोमयम् ॥ १ ॥ ॐ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ॥ ईश्वरींसर्वभूतानां तामिहोपह्वये श्रियम् ॥ २॥ ॐ आप्यायस्वेति पयः ॥ ॐ आप्यांयस्वसमेतुतेविश्वतं÷सोमवृष्ण्यंम् । भवावाजंस्य-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संगुथे ॥ ३ ॥ ॐ दधिक्राव्ण इति दधि ॥ ॐ दधिक्राव्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः ॥ सुरभिनो मुखाकरत्प्रणऽआयूंषि पितारिषत् ॥ ४ ॥ ॐ तेजोसीत्याज्यम् ॥ ॐ तेजोसिशुक्रमस्यमृतमसि धामनामासिप्रियंदेवानामनाधृष्टन्देवयजनमसि ॥ ५ ॥ ॐ देवस्यत्वेति कुशोदकम् ॥ ॐ देवस्यंत्वा ॥ ६ ॥ ॐ इति यज्ञकाष्ठेनालोड्य आपोहिष्ठेति त्रिभिर्मंत्रैः कर्मभूमिं यज्ञसंभारांश्च प्रोक्षयेत् ॥ ततः कृतांजलिः स्व स्तिन० इति मन्त्रं द्विवारं पठेत् ॥ भूमौ प्रादेशं कृत्वा ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देवाः आयांतु ॥ यातुधाना अपयांतु॥ विष्णो देवयजनं रक्षस्व॥ ततः सर्वतोभद्रं लिङ्गतोभद्रं वा रचयित्वा तत्र देवतास्थापनं पूजनं च कृत्वा ॥ ततः सर्वतोभद्रे लिङ्गतोभद्रे वा कलशस्थापनविधिना कलशं संस्थाप्य कलशोपरि अग्न्युत्तारणपूर्वकप्रधानप्रतिमां संस्थाप्य विधिना पूजयेत् ॥ तद्यथा ॥ प्रागुदीच्यां गता रेखाः कुर्यादेकोनविंशतिः ॥ खण्डेन्दुस्त्रिपदः श्वेतःपञ्चभिः कृष्णशृङ्खलाः ॥ १ ॥ नीलैकादश वल्ली तु भद्रं रक्तं पदैर्नव ॥ चतुर्विंशत्सिता वापी परिधिः पीत-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विंशतिः ॥ २ ॥ मध्ये षोडशभिः कोष्ठैः रक्तं पद्मं सकर्णिकम् ॥ परि-
ध्यावेष्टितं पद्मं बाह्ये सत्त्वंरजस्तमः ॥ तन्मध्ये स्थापयेद्देवान् ब्रह्मा-
द्याँश्च सुरेश्वरान् ॥ ३ ॥ इति सर्वतोभद्रकारिका ॥

अथ लिङ्गतोभद्रकारिका स्कांदे ॥ रेखा त्वष्टादश प्रोक्ताश्चतु-
र्लिङ्गसमुद्भवे ॥ कोणेन्दुस्त्रिपदः श्वेतास्त्रिपदैः कृष्णशृङ्खलाः ॥ १ ॥
वल्ली सप्तपदा नीला भद्रं रक्तं चतुष्पदम् ॥ भद्रपार्श्वे महारुद्रं कृष्ण-
मष्टादशैः पदैः ॥ २ ॥ शिवस्य पार्श्वतो वापीं कुर्यात्पञ्चपदां सिताम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदमेकं तथा पीतं भद्रवाप्योस्तु मध्यतः ॥ ३ ॥ शिरसि शृङ्खलायाश्च
कुर्यात्पीतं पदत्रयम् ॥ लिङ्गानां स्कन्धतः कोष्ठा विंशती रक्तवर्णका-
॥ ४ ॥ परिधिः पीतवर्णैस्तु पदैः षोडशभिः स्मृता ॥ पदैस्तु नवभि
पश्चाद्रक्तं पद्मं सकर्णिकम् ॥ ५ ॥ इति लिङ्गतोभद्रकारिका समाप्ता ॥

अथ पञ्च वर्णान्युक्तानि पञ्चरात्रे । रजांसि पञ्च वर्णानि मण्डलार्थं
हि कारयेत् ॥ शालितण्डुलचूर्णेन शुक्लं वा यवसम्भवम् ॥ १ ॥
रक्तं कुसुम्भसिन्दूरं गैरिकादिसमुद्भवम् ॥ हरितालोद्भवं पीतं रजनी-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्र० सम्भवं क्वचित् ॥ २ ॥ कृष्णदग्धैर्यवैः कार्यं हरितं बिल्वचूर्णकम् ॥ प्र०
६० कारयेत्सर्वधान्यैर्वा वर्णकैरुपशोभितम् ॥

अथ वेदोक्तसर्वतोभद्रलिङ्गतोभद्रदेवतास्थापनक्रमः ॥ तद्यथा ॥
ॐ ब्रह्मयज्ञानंप्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनऽआवः ॥ सबु
ध्न्याऽउपमाऽअस्यविष्ठाः सतश्च योनिमसतश्च विवः ॥ मध्ये
कर्णिकायां ॐ भू० ब्रह्मणे नमः ॥ ब्रह्माणमावाहयामि ॥ १ ॥ ॐ
वयꣳ सोमव्रतेतव मनस्तनूषुबिभ्रतः ॥ प्रजावन्तꣳ सचेमहि ॥ उत्तरे ६०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाप्यां ॐ भू० सोमाय नमः सोममा० ॥ २ ॥ ॐ तमीशांनुञ्जगंत
स्तस्थुषस्प्पतिंन्धियञ्जिन्न्वमवंसेहूमहे व्वयम् ॥ पूषानो यथाव्वेदं-
सामसंद्वृधेरंक्षिता पायुरदंब्धꣳ स्वस्तयें ॥ ईशान्यां खण्डेन्दौ ॐ
भू० ईशानाय० ईशानमा० ॥ ३ ॥ ॐ त्रातारमिन्द्रंमवितारमिन्द्रꣳ
हवें हवे सुहवꣳ शूरमिन्द्रंम् ॥ ह्वयांमि शक्रम्पुंरुहूतमिन्द्रंꣳ
स्वस्तिनों मघवां धात्विन्द्रंः ॥ पूर्वे वाप्यां ॐ भू० इन्द्राय० इन्द्रमा-
११ वा० ॥ ४ ॥ ॐ त्वन्नोऽअग्ने तवं देव पायुभिर्म्मघोनों रक्षतन्न्वश्च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वन्द्य ॥ त्राता तोकस्य तनंये गवांमस्य निंमेषꣳ रक्षंमाणस्तवं
व्व्रते ॥ आग्नेय्यां खण्डेन्दौ ॐ भू० अग्नये० अग्निमा० ॥ ५ ॥
ॐ यमायत्वाङ्गिरस्वते पितृमते स्वाहा ॥ स्वाहा घर्म्माय स्वाहा
घर्म्मः पित्रे ॥ दक्षिणे वाप्यां ॐ भू० यमाय० यममा० ॥ ६ ॥
ॐ असुंन्न्वन्तमयंजमानमिच्छस्तेनस्येत्यामन्न्विंहितस्कंरस्य ॥
अन्न्यमस्म्मदिंच्छसातंऽइत्या नमो देवि निर्ऋते तुभ्यंमस्तु ॥
नैर्ऋत्यां खण्डेन्दौ ॥ ॐ भू० निर्ऋतये० निर्ऋतिमा० ॥ ७ ॥ ॐ

प्र० ६१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्त्वांयामिब्ब्रह्मंणा व्वन्दंमानुस्तदाशांस्तेयजंमानो हुविर्ब्भिः ॥
अहेडमानोव्वरुणेहबोद्ध्युरुंशꣳ समानुऽआयुः प्प्रमोषीः ॥ पश्चि-
मे वाप्यां ॐ भू० वरुणाय० वरुणमा० ॥ ८ ॥ ॐ आनो नियुद्भिः
शतिनीभिरध्वुरꣳ० स्त्रहुस्रिणीभिरुपंयाहि युज्ञम् ॥ व्वायोऽअ-
स्मिन्त्सवंने मादयस्व यूयम्पातस्वुस्तिभिः सदांनः ॥ वायव्यां
खण्डेन्दौ ॐ भू० वायवे० वायुमा० ॥ ९ ॥ ॐ व्वसुंभ्यस्त्वा रुद्रेभ्यं
स्त्वादित्येभ्यंस्त्वा सञ्ज्ञांनाथान्द्यावा पृथिवी मित्त्रावरुंणौत्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृष्ट्यांवताम् ॥ द्यन्तुव्वयोक्तः रिहांणामरुताम्पृषंतीर्ग्गच्छव्वशा
पृश्निंर्न्नर्भृत्वा दिवंङ्गच्छततोंनोव्वृष्टिमावंह ॥ चक्षुष्पाऽअंग्नेसि
चक्षुंर्म्मेंपाहि ॥ वायुसोमयोर्मध्ये भद्रे ॥ ॐ भू० अष्टवसुभ्यो नमः
अष्टवसून् आवाहयामि ॥ १० ॥ ॐ नमंस्ते रुद्रमन्यवंऽउतोतऽइ
षंवे नमं÷॥बाहुभ्यांमुतते नमं÷॥सोमेशानयोर्मध्ये भद्रे०॥ ॐ भू०
एकादशरुद्रेभ्यो० एकादशरुद्राना० ॥ ११ ॥ ॐ यज्ञोदेवानाम्प्रत्ये-
ति सुम्म्नमादित्यासो भवंताम्मृडयन्तं÷ ॥ आवोर्व्वांचीं सुमतिर्व्वं-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृत्त्यादुह्‌ होऽश्चिद्यावांरिवोवित्तुरासंत् ॥ ईशानेन्द्रमध्ये भद्रे ॥
ॐ भू० द्वादशादित्येभ्यो नमः द्वादशादित्यानावाहयामि ॥ १२ ॥
ॐ अश्विना तेजंसा चक्षुंः प्राणेन सरंस्वती वीर्य्यम् ॥ वाचेन्द्रो
बलेनेन्द्रांयदधुरिन्द्रियम् ॥ ॐ भू० इन्द्राग्निमध्ये भद्रे ॥ ॐ भू०
अश्विभ्यां० अश्विनौ० ॥ १३ ॥ ॐ विश्वेदेवासऽआगंत शृणुतामंऽ
इमꣳ हवंम् ॥ एदम्बर्हिर्न्निषींदत ॥ उपयाम गृंहीतोसि विश्वे-
भ्यस्त्वा देवेभ्यंऽएषते योनिर्विंश्वेभ्यस्त्वादेवेभ्यंः ॥ अग्नि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यममध्ये भद्रे ॥ ॐ भू० सपैतृकविश्वेभ्यो देवेभ्यो० सपैतृकाविश्वा-
न्देवानावा० ॥ १४ ॥ ॐ अभित्यन्देवꣳ सवितारमोण्योः कविक्रं-
तुमर्चामि सत्यसवꣳ रत्नधाममभिप्रियम्मतिङ्कविम् ॥ ऊर्द्ध्वायस्या
मतिर्भाऽअदिद्युतत्सवीमनिहिरण्यपाणिरमिमीत सुक्रतुः कृपा-
स्वः ॥ प्रजाभ्यस्त्वाप्रजास्त्वानुप्राणन्तु प्रजास्त्वमनुप्राणि-
हि ॥ यमनिर्ऋतिमध्ये भद्रे ॥ ॐ भू० सप्तयक्षेभ्यो० सप्तयक्षाना०
॥ १५ ॥ ॐ नमोस्तु सर्पेभ्योयेके च पृथिवीमनु ॥ येऽअन्तरिक्षेयेदि

प्र० ६३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वितेभ्यः सर्पेभ्यो नमः॥ निर्ऋतिवरुणमध्ये भद्रे॥ ॐ भू० अष्टकु
लनागेभ्यो० अष्टकुलनागाना० ॥१६॥ ॐ ऋताषाडृतधामाग्नि-
र्गन्धर्वस्तस्यौषधयोऽप्सरसो मुदो नाम ॥ सन इदम्ब्रह्म क्षत्र-
म्पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥ वरुणवायुमध्ये भद्रे॥ ॐ
भू० गंधर्वाप्सरोभ्यो नमः गन्धर्वाप्सरसः आवा० ॥ १७ ॥ ॐ यद
क्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवा पुरीषात् ॥ श्येनस्य प
क्षा हरिणस्य बाहूऽउपस्त्युत्यम्महि जातन्तेऽअर्वन् ॥ ब्रह्मसोममध्ये

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाप्यां लिङ्गेवा ॥ ॐ भू० स्कन्दाय नमः स्कन्दमा० ॥१८॥ ॐ आशुः प्र०
शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ॥ सङ्क्रन्दनो
निमिषऽएकवीरः शतꣳसेनाऽअजयत्साकमिन्द्रः ॥ तदुत्तरे ॥ ॐ
भू० वृषभाय नमः वृषभमावा० ॥१९॥ ॐ कार्षिरसि समुद्रस्य त्वाक्षि
त्याऽउन्नयामि ॥ समापोऽअद्भिरग्मत समोषधीभिरोषधीः ॥ तदुत्तरे
ॐ भू० शूला० शूलमा० ॥२०॥ अनेनैव मंत्रेण तदुत्तरे ॐ भू० महाका
लायनमः महाकालमा० २१ ॐ शुक्रज्योतिश्च चित्रज्योतिश्च सत्य ६४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ज्यौतिश्च ज्योतिष्माँश्च ॥ शुक्रश्च ऋतपाश्चात्यंꣳहाः ॥ ब्रह्मेशा-
नमध्ये शृङ्खलायाम् ॥ ॐ भू० दक्षादिसप्तगणेभ्यो नमः दक्षादि-
सप्तगणाना० ॥ २२ ॥ ॐ अम्बेऽअम्बिकेऽम्बालिके नमा नयति
कश्चन ॥ ससस्त्यश्वकः सुभद्रिकाङ्काँपीलवासिनीम् ॥ ब्रह्मेन्द्रमध्ये
वाप्याम् लिङ्गे वा भू० दुर्गायै नमः ॥ दुर्गामा० ॥ २३ ॥ ॐ इदं विष्णु
र्विचक्रमे त्रेधानिदधेपदम् ॥ समूढमस्य पाꣳसुरे स्वाहा ॥ तत्पूर्वे ॥
ॐ भू० विष्णवे नमः ॥ विष्णुमा० ॥ २४ ॥ पितृभ्यः ÷

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्र० स्वधायिब्भ्यं ÷ स्वधानमं ÷ पितामहेब्भ्यं ÷ स्वधायिब्भ्यं ÷ स्व- प्र०
६५ धानमꣳ प्प्रपितामहेब्भ्यꣳ स्वधायिब्भ्यं÷ स्वधानमं÷ ॥ अक्षन्पि
तरोमीमदन्त पितरोऽतीतृप्पन्तापितरꣳ पितरꣳ शुन्धध्वम् ॥
ब्रह्माग्निमध्ये शृं० । ॐ भू० स्वधायै० ॥ स्वधां० ॥ २५ ॥ ॐ
परंम्मृत्योऽअनुपरेहि पन्थांय्यस्तेऽअन्यऽइतरोदेवयानात् ॥ चक्षु-
ष्मते शृण्वते तेब्ब्रवीमिमानं÷प्प्रजाꣳ रीरिषोमोतवीरान् ॥
ब्रह्मयममध्ये वाप्यां लिङ्गे वा । ॐ मृत्युरोगेभ्यो नमः ॥ मृत्युरो- ६५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गान्०॥ २६ ॥ ॐ गणानांन्त्वा गणपतिꣳ हवामहे प्रियाणांन्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वां निधिपतिꣳ हवामहेव्वसोमम ॥ आहमंजानिगर्भ्म् धमात्वमंजासि गर्भधम् ॥ १ ॥ ब्रह्मनिर्ऋतिमध्ये शृ० ॐ गणपतये नमः ॥ गणपतिं० ॥२७॥ ॐ अप्स्वग्ग्ने सधिष्टु वसौषधीरनुरुध्यसे ॥ गर्भे सञ्जायसे पुनः ॥ ब्रह्मवरुणमध्ये वाप्यां लिङ्गे वा । ॐ अद्भ्यो नमः ॥ अपः० ॥ २८ ॥ ॐ मरु-तोयस्यहिक्षये पाथादिवो विमहसः ॥ ससुगोपातमो जनः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्रह्मवायुमध्ये शं० । ॐ भू० मरुद्भ्यो नमः ॥ मरुतः० ॥ २९ ॥ प्र०
ॐ स्योना पृथिवि नोभवानृक्षरानिवेशनि ॥ यच्छानःशर्म्म सप्रथाः ॥ ब्रह्मणः पादमूले । ॐ भू० पृथिव्यै नमः ॥ पृथ्वीं० ॥ ३० ॥
ॐ पंचनद्यःसरस्वतीमपियन्ति सस्रोतसः ॥ सरस्वतीतुपंचधा सोदेशे भवत्सरित् ॥ तदुत्तरे । ॐ भू० गङ्गादिनदीभ्यो नमः ॥ ३१ ॥
गङ्गादिन० ॥ ३१ ॥ ॐ समुद्रोसि नभस्वानार्द्रदानुः शम्भूर्म्मयो ६६
भूरभिमांवाहिस्वाहा मारुतोसि मरुतांगणः शम्भूर्म्मयोभूरभि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

माँव्वाहि स्वाहां व्वस्यूरंसिदुर्व्वस्वाञ्छुम्भूर्म्मयोभूरभिमांव्वाहि स्वाहां॥ तदुत्तरे। ॐ भू० सप्तसागरेभ्यो नमः॥ सप्तसागरान्०॥३२॥ ॐ प्रपर्व्वतस्य व्वृषभस्यं पृष्ठान्नावंश्चरान्ति स्वसिचंऽइयानाः॥ ताऽआववृत्रन्न धरागुदक्ताऽअहिम्बुध्न्यमनुरीयंमाणाः॥ व्विष्णोर्व्विक्रमणंमसि व्विष्णोर्व्विक्क्रांन्तमसि व्विष्णोःक्क्रान्तमंसि॥ कर्णिकापरिधौ। ॐ भू० मेरवे नमः॥ मेरुं०॥३३॥ अथ

 सोमादिक्रमेण॥ ॐ गणानांन्त्वा०॥ सत्त्वबाह्यपरिधौ। ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्र० भू० गदायै नमः ॥ गदां० ॥ ३४ ॥ ॐ त्रिꣳ शद्धामव्विराजति ग्र०
६७ व्वाक्पतङ्गाय धीयते ॥ प्रतिवस्तोरहद्युभिः ॥ ईशान्याम् ॥
ॐ भू० त्रिशूलाय० ॥ त्रिशूलं० ॥ ३५ ॥ ॐ महाँ २ ऽइन्द्रोव्व
ज्रहस्तꣳ षोडशीशर्म्मयच्छतु ॥ हन्तुपाप्मानं योस्मान्द्वेष्टि ॥
उपयाम गृहीतोसि महेन्द्रायत्वैषतेयोनिर्म्महेन्द्राय त्वा ॥ पूर्वे ॥
ॐ भू० वज्राय नमः ॥ वज्रमा० ॥ ३६ ॥ ॐ व्वसुचमेव्वस- ६७
तिश्चमे कर्म्मचमे शक्तिश्चमेर्थश्चमऽएमश्चमऽइत्याचमेग-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिश्चमे सुज्ञेनं कल्पन्ताम् ॥ आग्नेय्याम् ॥ ॐ भू० शक्तये नमः ॥
शक्तिं० ॥३७॥ ॐ इडऽएह्यदितऽएहिकाम्म्याऽएत ॥ मयिवः
कामधरंणम्भूयात् ॥ दक्षिणे ॥ ॐ भू० दण्डाय नमः दण्डं० ॥३८॥
ॐ खड्गोवैश्वदेवः श्वाकृष्ष्णः कुर्णोगर्द्दभस्तरक्षुस्तेरक्षंसामिन्द्राय
शूकरः सिंहोमारुतः कृकलासः पिप्पका शकुनिस्तेशरव्यायै
विश्वेषान्देवानाम्पृषतः ॥ नैर्ऋत्यां ॥ ॐ भू० खड्गाय नमः ॥ खड्गं०
॥३९॥ ॐ उदुत्तमं व्वरुणपाशमस्म्मदवाधमं व्विमध्यमᳩश्रथाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

अथाव्वयमादित्य व्व्रते तवानागसोऽअदितये स्याम॥पश्चिमे॥ ॐ भू०
पाशाय नमः ॥ पाशं० ॥४०॥ ॐ अꣳशुश्चमे रश्मिश्चमे
दाभ्यश्चमेऽधिपतिश्चमऽउपाꣳशुश्चमेन्तर्यामश्चमऽऐन्द्र-
वायवश्चमे मैत्रावरुणश्चमऽआश्विनश्चमे प्प्रतिप्प्रस्थानश्चमे शुक्र-
श्चमे मन्थीचमे यज्ञेन कल्पन्ताम् ॥ वायव्याम् ॥ ॐ भू०
अङ्कुशाय नमः ॥ अङ्कुशं० ॥४१॥ ॐ आयङ्गौः पृश्निरक्रमी-
दसदन्मातरम्पुरः ॥ पितरञ्च प्प्रयन्त्स्वः ॥ तद्बाह्ये उत्तरे रक्तपरिधौ

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सोमादि० ॥ ॐ भू० गौतमाय नमः ॥ गौतमं० ॥४२॥ ॐ
अयन्दक्षिणा विश्वकर्म्मा तस्य मनो वैश्वकर्म्मणङ्ग्रीष्मो
मानसस्त्रिष्टुब्ग्रैष्मीत्रिष्टुभः स्वारँ स्वारादन्तर्यामोन्तर्यामा
त्पञ्चदशः पञ्चदशाद्बृहद्भरद्वाजऽऋषिः प्रजापतिगृहीतयात्वया
मनो गृह्णामि प्रजाभ्यः ॥ ईशान्याम् ॥ ॐ भू० भरद्वा-
जाय नमः ॥ भरद्वाजं० ॥४३॥ ॐ इदमुत्तरात्स्वस्तस्य श्रोत्रँ
सौवँ शरच्छ्रौत्र्यनुष्टुप्शारद्यनुष्टुभऽ ऐडमैडान्मन्थीमन्थिनऽ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकविꣳशऽएकविꣳशाद्वैराजं विश्वामित्रऽऋषिः प्रजापति-
गृहीतया त्वयाश्श्रोत्रङ्गृह्णामि प्रजाभ्यः ॥ पूर्वे ॥ ॐ भू०
विश्वामित्राय नमः ॥ विश्वामित्रं० ॥४४॥ ॐ त्र्यायुषञ्जम-
दग्नेः कश्यपस्य त्र्यायुषम् ॥ यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु
त्र्यायुषम् ॥आग्नेय्यां॥ ॐ भू० कश्यपाय नमः ॥ कश्यपं० ॥४५॥
ॐ अयम्पश्चाद्विश्वव्यचास्तस्य चक्षुर्विश्वव्यचसं वर्षाश्चा-
क्षुष्यो जगतीवार्षी जगत्याऽऋक्सममृक्समाच्छुक्रश्शुक्रा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्सप्तदशः सप्तदशाद्वैरूपञ्जमदग्निर्ऋषिः प्रजापतिगृहीतया
त्वयाचक्षुर्गृह्णामिप्रजाभ्यः॥ दक्षिणे॥ ॐ भू० जमदग्नये नमः॥
जमदग्निं० ॥४६॥ ॐ अयम्पुरोभुवस्तस्यप्राणो भौवायनो
वसन्तःप्राणायनो गायत्री वासन्ती गायत्र्यै गायत्रङ्गायत्रा-
दुपांशुरुपांशोस्त्रिवृत्त्रिवृतो रथन्तरं वसिष्ठऋषिःप्रजा-
पतिगृहीतया त्वया प्राणङ्गृह्णामिप्रजाभ्यः॥ नैर्ऋत्यां॥ ॐ भू० व-
सिष्ठाय नमः॥ वासिष्ठं०॥४७॥ ॐ अत्र पितरो मादयध्वंयथा भागमा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृंषायद्धम्। अमीमदन्तपितरोंसथाभागमावृंषायिषत॥ पश्चिमे॥ ॐ भू० अत्रये नमः॥ अत्रिं० ॥ ४८॥ ॐ तम्पत्नीभिरनुंगच्छेम देवाः पुत्रैर्भ्रातृंभिरुतवा हिरंण्यैः ॥ नाकंङ्गृभ्णानाःसुंकृतस्यंलोकेतृतीयें पृष्ठेऽअधिरोचने दिवः॥ वायव्यां॥ ॐ भू० अरुन्धत्यै नमः॥ अरुन्धतीं० ॥ ४९ ॥ तद्बाह्ये कृष्णपरिधौ पूर्वादिक्रमेण। ॐ अदित्यैरास्नासीन्द्राण्याऽउष्णीषः॥ पूषासिघर्म्मायंदीष्व॥ पूर्वे॥ ॐ भू० ऐन्द्र्यै नमः॥ ऐन्द्रीं०॥ ५०॥ ॐ अम्बेऽअम्बि० ॥ आग्ने-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

य्यां ॥ ॐ भू० कौमार्य्यै नमः ॥ कौमारीं० ॥ ५१ ॥ ॐ इन्द्रायांहि
धियेषितो व्विप्प्रंजूतꣳ सुतावंतꣳ ॥ उपब्ब्रह्म्माणि ब्बाग्घतं÷ ॥
दक्षिणे ॥ ॐ भू० ब्राह्म्यै नमः ॥ ब्राह्मीमा० ॥ ५२ ॥ ॐ इन्द्रंस्य
क्रोडोदित्यै पाजस्यन्दिशाञ्जत्रवोदित्यै भसज्जीमूतान्न्हृदयौ-
पशेनान्तरिक्षम्पुरीततानभंऽउदर्य्येण चक्रवाकौमतंस्नाब्भ्यान्दि
वंव्वृक्काब्भ्यांङ्गिरीन्न्प्लाशिभिरुपंलान्न्प्लीह्नाव्वल्म्मीकान्न्क्लोम
भिंग्ग्लौभिर्ग्गुल्म्मान्हिराभिꣳ स्रवंन्तीर्ह्नदान्न्कुक्षिब्भ्याꣳसमुद्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुदरेण वैश्वानरं भस्मना ॥ नैर्ऋत्यां ॥ ॐ भू० वाराह्यै नमः ॥
वाराहीमा० ॥ ५३ ॥ ॐ अम्बेऽअम्बिकेऽम्बालिके नमान-
यतिकश्चन ॥ ससंस्त्यश्वकः सुभद्रिकां काँपीलवासिनीम् ॥ पश्चिमे
चामुण्डायै नमः ॥ चामुण्डामा० ॥५४॥ ॐ आप्यायस्व समेतु ते
विश्वतः सोमवृष्ण्यम् ॥ भवा वाजस्य सङ्गथे ॥ वायव्ये ॥
ॐ भू० वैष्णव्यै नमः ॥ वैष्णवीमा० ॥ ५५ ॥ ॐ याते रुद्र
शिवातनूरघोरा पापकाशिनी ॥ तयानस्तन्वाशन्तं मया गिरिश-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्ताभिचांकशीहि ॥ उत्तरे ॥ ॐ भू० माहेश्वर्यै नमः ॥ माहेश्व
रीमा० ॥५६॥ ॐ समंख्ये देव्याधिया सन्दाक्षिणयोरुचंक्षसा ॥ माम॒ऽ
आयु॑ प्प्रमोषीम्मोंऽ अहन्तवं व्वीरंव्विंदेय तवं देवि सन्दृशि ॥
ईशान्यां । ॐ भू० वैनायक्यै नमः वैनायकीं० ॥ ५७ ॥ इति
सर्वतोभद्रदेवतास्थापनक्रमः ॥

अथ लिंगतोभद्रदेवताविशेषः ॥ ॐ नमं÷कृत्स्नायतया धाव
तेसत्त्वंनाम्पतंये नमो नमः सहंमानायनिव्याधिनंऽआव्याधि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नीनाम्पतये नमोनमो निषङ्गिणे ककुभायस्तेनानाम्पतये नमो-
नमो निचेरवे परिचरायारण्यानाम्पतये नमः ॥ तद्वाह्ये पूर्वे ॥
ॐ भू० असिताङ्गभैरवाय नमः ॥ असिताङ्गभैरवं० ॥ १ ॥ ॐ
श्वित्रऽआदित्यानामुष्ट्रो घृणी वा न्वार्ध्रीनसस्ते मत्याऽअरण्या
यसृमरोरुरूरौद्रः क्वयिः कुटरुर्दात्यौहस्ते वाजिनाङ्कामाय-
पिकः॥ आग्नेय्यां ॥ ॐ भू० रुरुभैरवाय नमः रुरुभैरवं० ॥ २ ॥
ॐ उग्रंल्लोहितेन मित्रꣳ सौव्व्रत्येनरुद्रन्दौर्व्रत्येनेन्द्रम्प्रक्की

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

डेनं मरुतो बलेन साद्ध्यान्प्रमुदा ॥ भवस्य कण्ठ्यꣳ रुद्र-
स्यान्तःपार्श्व्यम्महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् ॥
दक्षिणे ॥ ॐ भू० चण्डभैरवाय नमः ॥ चण्डभैरवं० ॥ ३ ॥ ॐ
इन्द्रस्य क्रोडोदित्यै पाजस्यन्दिशाञ्जत्रवो दित्यै भसज्जीमूता-
न्हृदयौपशेनान्तरिक्षम्पुरीततानभ ऽउदर्य्येणचक्रवाकौमतस्ना-
भ्यान्दिवं वृक्काभ्याङ्गिरीन्प्लाशिभिरुपलान्प्लीह्ना वल्म्मी

कान्क्लोमभिर्ग्लौभिर्गुल्मान्हिराभिः स्रवन्तीर्ह्रदान्कुक्षि

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऽभ्यांᳪं समुद्रमुदरेंणवैश्वानरम्भसमंना । नैर्ऋत्यां ॥ ॐ भू०
क्रोधभैरवाय नमः ॥ क्रोधभैरवं० ॥ ४ ॥ ॐ उन्नतऽऋषभो
वांमनस्तऽऐन्द्रावैष्णवाऽउंन्नतः शितिबाहुः शितिपृष्ठस्तऽ
ऐन्द्राबार्हस्पत्याःशुक्रंरूपा वाजिनाः कुल्माषांऽआग्नि मारु-
ताः श्यामाः पौष्णाः ॥ पश्चिमे ॥ ॐ भू० उन्मत्तभैरवाय
नमः ॥ उन्मत्तभैरवं० ॥ ५ ॥ ॐ कार्षिरासि समुद्रस्यत्वाक्षित्याऽ-
उन्नंयामि ॥ समापोंऽअद्भिरंग्मतसमोषंधीभिरोषंधीः ॥ वाय-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यां । ॐ भू० कपालभैरवाय नमः ॥ कपालभैरवं० ॥ ६ ॥ ॐ उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च ॥ सासह्वाँश्चाभियुग्वा च विक्षिपः स्वाहा ॥ उत्तरे ॥ भू० भीषणभैरवाय नमः ॥ भीषणभैरवं० ॥ ७ ॥ ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥ ईशान्यां । ॐ भू० संहारभैरवाय नमः ॥ संहारभैरवं० ॥ ८ ॥ ॐ नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पशुपतये च नमो नीलग्ग्रीवाय च शितिकण्ठाय च ॥ तद्वाह्ये पूर्वे ॥
ॐ भू० भवाय नमः ॥ भवं० ॥ १ ॥ ॐ अग्निꣳ हृदयेनाशनिꣳ हृद-
याग्ग्रेण पशुपतिं कृत्स्नहृदयेन भवंऽयक्ना ॥ शर्व्वम्मतस्नाभ्यामी-
शानम्मन्युनामहादेवमन्तꣳपर्शव्येनोग्ग्रन्देवंव्वनिष्ठुनाव्वसिष्ठहनुꣳ
शिङ्गीनिकोश्याभ्याम् ॥ आग्नेय्यां । ॐ भू० सर्वाय नमः ॥ सर्वं०
॥ २ ॥ ॐ उग्ग्रँल्लोहितेन मित्रꣳसौव्व्रत्येनरुद्रन्दौर्व्व्रत्येनेन्द्रम्प्रक्री-
डेनमरुतो बलेन साध्यान्प्रमुदा ॥ भवस्य कण्ठ्यꣳ रुद्रस्यान्तꣳ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पार्श्व्यम्मंहादेवस्य सकृंच्छ्वंस्यंवनिष्ठुः पंशुपतेंः पुरीतत् ॥
दक्षिणे ॥ मू० पशुपतये नमः ॥ पशुपतिं० ॥ ३ ॥ ॐ तमीशांनं
जगंतस्तस्थुषस्पतिंन्धियञ्जिन्वमवंसे हूमहेव्वयम् ॥ पूषानो
यथाव्वेदंसामसंद्वृधेरंक्षितापायुरदंब्धःस्वस्तयें ॥ नैर्ऋत्यां । ॐ मू०
ईशानाय नमः ॥ ईशानं० ॥ ४ ॥ ॐ नमस्तेंरुद्रमन्यवं उतोत
इषंवेनमंः ॥ बाहुभ्यांमुतते नमंः ॥ पश्चिमे ॥ ॐ मू० रुद्राय नमः
रुद्रं० ॥ ५ ॥ ॐ उग्रश्चं भीमश्चध्वान्तश्चधुनिश्च ॥ सासह्वाँश्चांभियु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्र० ग्वाचं व्विक्षिपुꣳस्वाहा ॥ वायव्यां ॥ ॐ उग्राय नमः ॥ उग्रं० ॥६॥ ॐ प्र०
७५ व्वेदाहमेतम्पुरुषम्महान्तमादित्यवर्णन्तमसꣳ परस्तात् ॥ तमेव
व्विदित्वातिमृत्त्युमेति नान्न्यःपन्था व्विद्यतेऽयनाय ॥ उत्तरे ॥ ॐ
भू० भीमाय नमः ॥ भीमं० ॥७॥ ॐ मानो महान्तमुतमानोऽअ-
र्ब्भकम्मानऽउक्षन्तमुतमानऽउक्षितम् ॥ मानोव्वधीꣳ पितरम्मोत-
मातरम्मानः प्प्रियास्तन्न्वो रुद्ररीरिषꣳ ॥ ईशान्यां ॥ ॐ भू० महते
नमः ॥ महान्तं० ॥ ८ ॥ ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी ॥ ७५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सच्छांनुꣳशर्म्मसप्प्रथाꣳ॥ तद्वाह्ये पूर्वे। ॐ भू० अनन्ताय नमः॥ अनन्तं० ॥ १ ॥ ॐ देहिमेददामि तेनिमेधेहिनितेंदधे॥ निहारं ञ्जहरासिमे निहारन्निहराणि तेस्वाहा ॥ आग्नेय्यां। ॐ भू० वासुकये नमः॥ वासुकिं०॥२॥ ॐ नमस्तक्षभ्यो रथकारेभ्यं-श्च वो नमोनमꣳकुलालेभ्यꣳकुम्मारेभ्यश्चवो नमो नमो निषादे-भ्यं÷ पुञ्जिष्ठेभ्यश्चवो नमोनमं÷ श्वनिभ्यो मृगयुभ्यंश्च वो नमं÷ ॥ दक्षिणे। ॐ भू० तक्षकाय नमः ॥ तक्षकं० ॥ ३ ॥ ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुरुषमृगश्चन्द्रमसो गोधा कालकादार्व्वाघाटस्तेव्वनस्पतीनाङ्कु-
कवाकुः सावित्रोहु६सोव्वातंस्यनाक्रोमकरं कुलीपयस्ते कूपारस्य-
ह्रियै शल्यकं ॥ नैर्ऋत्यां ॥ ॐ भू० कुलिशाय नमः कुलिशं०
॥ ४ ॥ ॐ सोमायकुलुङ्गऽआरण्योजोनकुलः शकाते पौष्णाः
क्रोष्टामायोरिन्द्रस्यगौरमृगः पिद्वोन्न्यङ्कुः कक्कटस्तेनुमत्यैप्र-
तिश्रुत्कायैचक्रवाकः ॥ पश्चिमे ॐ भू० कर्कोटकाय नमः ॥
कर्कोटकं० ॥ ५ ॥ ॐ अग्निर्ऋषिं पवमानं पाञ्चजन्न्यंपुरो-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हितं ॥ तमीमहेमहागयम् ॥ उपयाम गृहीतोस्यग्ग्नये त्वाव्वर्च्च
स एषते योनिरग्ग्नयेत्वाव्वर्च्चसे॥ वायव्यां। ॐ भू० शंखपालाय नमः
शंखपालं०॥६॥ ॐ सीसेनतंत्रम्मनंसामनीषिणंऽऊर्ण्णासूत्रेण कुव-
योव्वयन्ति॥ अश्विनां सज्ञं सविता सरस्वतीन्द्रस्य रूपं व्वरुणोभि
षज्यन्॥ उत्तरे ॐ भू० कम्बलाय नमः॥ कम्बलं० ॥७॥ॐ अश्व
स्तूपरोगो मृगस्ते प्प्राजापत्याः कृष्णग्ग्रीवऽआग्ग्नेयोरराटे पुर
स्तात्सारस्वती मे षष्युधस्ताद्धन्वोराश्विनावधोरामौ बाह्वोः सौमा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्र० पौष्णः श्यामो नाभ्याᳬं सौर्य्यामौ श्वेतश्चं कृष्णश्चं पार्श्व- ग्र०
७७ योस्त्वाष्ट्रौ लोमशसंक्थौ सक्थ्योर्वायव्यः श्वेतः पुच्छ ऽइन्द्रा-
य स्वपस्याय वेहद्वैष्णवो वामनः ॥ ईशान्यां । ॐ भू० अश्व-
तराय० ॥ अश्वतरं० ॥ ८ ॥ नमः श्वभ्यः श्वपतिभ्यश्च वो नमो
नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नील-
ग्रीवाय च शितिकण्ठाय च ॥ ईशानेन्द्रमध्ये ॥ ॐ भू० शूलाय
नमः ॥ शूलं० ॥ १ ॥ ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो ऽ ७७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अजायत । श्रोत्रांद्वायुश्चं प्प्राणश्चमुखांदुग्निरंजायत ॥ इन्द्रा-
ग्निमध्ये । ॐ भू० चन्द्रमौलिने नमः चन्द्रमौलिनं० ॥ २ ॥ ॐ
चुन्द्रमांऽअुप्स्वुन्तरासुंपुण्र्णोंधांवतेदिुवि ॥ रुयिम्पुशङ्गंम्बहुुलम्पुं
रुुस्पृहुं६ हरिरेतुिकनिंक्रदत् ॥ अग्नियमयोर्मध्ये । ॐ भू० चन्द्रमसे
नमः । चन्द्रमसं० ॥ ३ ॥ ॐ आुशुः शिशांनोवृुषुभोनभीुमोघंना-
घुनःक्षोभंणश्चर्षणीनाम् ॥ सुङ्क्रन्दंनोानिमिुषऽएंकवुीरःशुतं६ सेनांऽ
अजयत्साुकमिन्द्रः ॥ यमनिर्ऋतिमध्ये । ॐ भू० वृषभध्वजाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः ॥ वृषभध्वजं० ॥ ४ ॥ ॐ सुगावो देवाꣳ सदनाऽअकर्म्म यऽ
आजग्मेदꣳ सवनञ्जुषाणाः ॥ भरमाणाव्वहमानाहवीꣳष्य
स्म्मेधंत्त व्वसवोव्वसूनिस्वाहा ॥ निर्ऋतिवरुणमध्ये ॥ ॐ भू०
त्रिलोचनाय नमः ॥ त्रिलोचनं० ॥ ५ ॥ ॐ रुद्राःसꣳसृज्य
पृथिवीम्बृहज्ज्योतिꣳ समीधिरे ॥ तेषाम्भानुरजस्स्रऽइच्छुक्रो देवेषु
रोचते ॥ वरुणवायुमध्ये । ॐ भू० शक्तिधराय नमः शक्तिधरं०
॥ ६ ॥ ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुक-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मिंवबन्धंनान्न्मृत्योर्म्मुक्षीयमामृतांत् ॥ वायुसोममध्ये । ॐ भू० महेश्वराय नमः ॥ महेश्वरं० ॥ ७ ॥ ॐ सावाङ्कशामधुंमत्याश्विंना सुनृतावंती ॥ तयांयज्ञंमिंमिक्षतम् ॥ सोमेशानमध्ये । ॐ भू० शूलपाणये नमः ॥ शूलपाणिं० ॥ ८ ॥ इति लिङ्गतोभद्रदेवता- स्थापनं पूजनं च ॥

तत्र मध्ये महीद्यौरित्यादिमंत्रेण ताम्रकलशं प्रतिष्ठाप्य

 वरुणं संपूज्य तस्योपरि स्वर्णमयीं प्रधानप्रतिमामग्न्युत्तारण-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूर्वकं स्थापयेत् ॥

अथाग्न्युत्तारणविधिः ॥ तत्राचार्यः पात्रान्तरे प्रतिमनिधाय घृतेनाभ्यज्य उपरि जलधारां कुर्यात् ॥ तत्र मंत्राः ॥ ॐ समुद्रस्यत्वा वंकुयाग्ने परिंव्ययामसि ॥ पावकोऽअस्मभ्यंꣳ शिवो भंव ॥ १ ॥ ॐ हिमस्यंत्वा जरायुणाांग्ने परिंव्ययामसि ॥ पावको अस्मभ्यंꣳ शिवो भंव ॥ २ ॥ ॐ उपज्ज्मन्नुपंवेतसेऽवंतरनुदीष्वा ॥ अग्नैं पित्तमपामंसि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मण्डूकिताभिरागहि सेमन्नो यज्ञम्पावकवर्णꣳ शिवङ्कृधि ॥ ३ ॥ ॐ अपामिदन्न्ययनꣳ समुद्रस्य निवेशनम् ॥ अन्याँ-स्तेऽअस्म्मत्तपन्तु हेतयः पावकोऽअस्म्मभ्यꣳ शिवो भव ॥ ४ ॥ ॐ अग्ने पावकरोचिषा मन्द्रया देव जिह्वया ॥ आदेवान्वक्षि यक्षि च ॥ ५ ॥ ॐ सनः पावक दीदिवोग्ग्ने देवाँ २ ऽइहा-वह ॥ उपयज्ञꣳ हविश्चनः ॥ ६ ॥ ॐ पावकया यश्चित्तयन्त्याकृपाक्षा मन्न्नुरुचऽउषसोन भानुना ॥ तूर्व्वन्नयामन्नेत

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शस्युनूरणऽआयो घृणेन तं तृषाणोऽअजरं÷ ॥ ७ ॥ ॐ नमंस्तेऽह-
रंसे शोचिषेनमंस्तेऽअस्त्वर्चिषे ॥ अन्याँस्तेऽअस्ममत्तंपन्तु हेतयं÷
पावकोऽअस्मभ्यंꣳ शिवोभंव ॥ ८ ॥ ॐ नृषदेव्वेडप्सुषदेव्वेड्वर्हिं
षदेव्वेड्व्वंनसदेव्वेट्स्वर्व्विदेव्वेट् ॥ ९ ॥ ॐ ये देवा देवानांय्यज्ञियां यज्ञियां
ना ꣳ संव्वत्सरीणमुपंभागमासंते ॥ अहुतादोंहविषोंयज्ञेऽअस्मिम
न्तस्वयम्पिंबन्तु मधुंनोघृतस्यं ॥ १० ॥ ॐ ये देवा देवेष्वधिंदेवत्वमा
यन्न्ये ब्रह्मंणꣳ पुरऽएतारोंऽअस्य ॥ येभ्योनऽऋते पवंते धाम किञ्च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न न ते दिवो नऽपृथिव्याऽअधिस्नुषुं ॥ ११ ॥ ॐ प्राणदाऽअपां नदा व्यानदावर्च्चोदा वरिवोदाः ॥ अन्न्यांस्तेऽअस्मत्तपन्तु हेतयंः पावकोऽअस्मभ्यं शिवो भव ॥ १२ ॥ इति अग्न्युत्तारणं कृत्वा ॥ प्राणप्रतिष्ठां कुर्यात् ॥ तद्यथा ॥ प्रतिमां हस्तेन संस्पृश्य बीजमंत्रान् जपेत् ॐ आँह्रींक्रों यं रं लं वं शं षं सं हं सः अस्यां मूर्तौ प्राणाः इह प्राणाः ॥ पुनः ॥ आं ह्रीं० सः० अस्यां मूर्तौ जीव इह स्थितः ॥ पुनः ॥ आं ह्रीं० सः० अस्यां मूर्तौ सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ अस्यै[1] प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ॥ अस्यै देवत्वमर्चायै मामहेति च कश्चन ॥ ॐ मनो जूतिरिति प्रतिष्ठां कृत्वा पूजयेत् ॥ इत्यग्न्युत्तारणविधिः प्राणप्रतिष्ठा च समाप्ता ॥

अस्मिन् ग्रहशांत्याख्ये कर्मणि पञ्चभूसंस्कारपूर्वकमाग्निस्थापनं करिष्ये ॥ अथ पञ्चभूसंस्कारः ॥ कुशैः परिसमूह्य तान्कुशानैशान्यां परित्यज्य १ गोमयोदकाभ्यामुपलिप्य २ स्रुवेणोल्लिख्य ३

१ प्रतिमाहृद्यङ्गुष्ठं दत्वा जपेत् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनामिकाङ्गुष्ठेनोद्धृत्य ४ जलेनाभ्युक्ष्य ५ ॐ अग्निदूतं पुरोदंधे हव्यवाहमुपंब्रुवे ॥ देवाँऽआसांदयादिह ॥ इत्यग्निं स्थापयेत् ॥ अथ सूर्यादिग्रहाणां स्थापनक्रमः ॥ स्कान्दे ॥ ईशाने मण्डलं कृत्वा ग्रहाणां स्थापनं ततः ॥ वृत्तमंडलमादित्यमर्धचन्द्रं निशाकरम् ॥ त्रिकोणं मङ्गलं चैव बुधं च धनुषाकृतिम् ॥ गुरुमष्टदलं प्रोक्तं चतुष्कोणं च भार्गवम् ॥ नराकृतिं शनिं विद्याद्राहुं च मकराकृतिम् ॥ केतुं खड्गसमं ज्ञेयं ग्रहमंडलके शुभे ॥१॥ अथ प्रकारान्तरम् ॥ वृत्त-

टि० (१) मानवसंहितायाम् ॥ कर्तुः शाखोक्तमार्गेण आचार्यस्याथवा पुनः ॥ कुर्यादग्निप्रणयनं हवनादिविधीन् तथा ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मण्डलमादित्यं चतुरस्रं निशाकरम्॥ त्रिकोणं मङ्गलं चैव बुधं वै
बाणसन्निभम्॥ गुरवे पट्टिशाकारं पञ्चकोणं भृगुन्तथा॥ मन्दे च
धनुषाकारं सूर्पाकारन्तु राहवे॥ केतवे च ध्वजाकारं मण्डलानि
क्रमेण तु॥ शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ॥ प्रत्य-
ङ्मुखौ शनीसोमौ शेषा दक्षिणतो मुखाः॥ मध्ये तु भास्करं
विंद्याच्छशिनं पूर्वदक्षिणे॥ दक्षिणे लोहितं विंद्याद्बुधं पूर्वोत्तरेण तु॥
उत्तरेण गुरुं विंद्यात्पूर्वेणैव तु भार्गवम्॥ पश्चिमे तु शनिं विन्द्याद्राहुं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दक्षिणपश्चिमे ॥ पश्चिमोत्तरतः केतुं इत्येषा ग्रहसंस्थितिः ॥ आदित्याभिमुखाः सर्वे साधिप्रत्यधिदेवताः ॥ अधिदेवता दक्षिणे वामे प्रत्यधिदेवताः ॥ अरुणौ सूर्यभौमौ च श्वेतौ शुक्रनिशाकरौ ॥ हरितवर्णौ बुधश्चैव पीतवर्णौ गुरुस्तथा ॥ कृष्णवर्णाः शनीराहुकेतवस्तु तथैव च ॥ ततः पूर्वनिर्मितहस्तमात्रं चतुरस्रं ग्रहवेद्यां श्वेतवस्त्रं प्रसार्य नवग्रहमण्डलं विलिख्य मध्यादिकोष्ठेषु उक्तदिक्षु विदिक्षु सूर्यादिग्रहाणां स्थापनं पूजनं च कुर्यात् ॥ अथ सूर्या-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ह्यावाहनम् ॥ जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम् ॥ तमोऽरिं
सर्वपापघ्नं सूर्यमावाहयाम्यहम् ॥ ॐ आकृष्णेनुरजंसाव्वर्तमानो
निवेशयंन्नमृतं मर्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयांतिभुवं
नानिपश्यंन् ॥ ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यपसगोत्र
रक्तवर्ण भो सूर्य इहागच्छ इह तिष्ठ सूर्याय नमः ॥ सूर्यमावाह-
यामि स्थापयामि ॥ १ ॥ दधिशंखतुषाराभं क्षीरोदार्णवसंभवम् ॥
ज्योत्स्नापतिं निशानाथं सोममावाहयाम्यहम् ॥ इमंदेवाऽअसपु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्क्रुष्ठः सुंवध्वम्महतेक्षत्राय्यंमहतेज्यैष्ठ्यायमहतेजानंराज्यायेन्द्रं-
स्येन्द्रियाय्यं॥इममुमुष्यंपुत्रममुष्यैपुत्रमस्यैविशऽएषवोमीराजा
सोमोऽस्माकंब्राह्मणाना ७ राजा ॥ ॐ भू० यमुनातीरोद्भव
आत्रेयसगोत्र शुक्लवर्ण भो सोम इहागच्छ इह तिष्ठ सोमाय नमः॥
सोममावाहयामि स्थापयामि ॥ २ ॥ धरणीगर्भसंभूतं विद्युत्तेज-
स्समप्रभम् ॥ कुमारं शक्तिहस्तं च भौममावाहयाम्यहम् ॥ ॐ
अग्निर्मूर्द्धादिवःककुत्पतिः पृथिव्याऽअयम् ॥ अपा ७ रेता ७ सिजि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्वति ॥ ॐ भू० अवंतिकापुरोद्भव भरद्वाजसगोत्र रक्तवर्ण भो भौम
इ० भौमाय० भौम० ॥ ३ ॥ प्रियंगुकलिकाभासं रूपेणाप्रतिमं बुधम् ॥
सौम्यं सौम्यगुणोपेतं बुधमावाहयाम्यहम् ॥ ॐ उद्बुध्यस्वाग्ने
प्रतिजागृहित्वमिष्टापूर्ते सꣳ सृजेथामयं च ॥ अस्मिन्सधस्थेऽ
अध्युत्तरस्मिन्विश्वेदेवायजमानश्च सीदत ॥ ॐ भू० मगधदेशो
द्भव आत्रेयसगोत्र हरितवर्ण भो बुध इ० बुधाय० बुधमा० ॥ ४ ॥
देवानां च मुनीनां च गुरुं कांचनसन्निभम् ॥ वंद्यभूतं त्रिलोकानां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गुरुमावाहयाम्यहम् ॥ ५ ॥ ॐ बृहंस्पतेऽअतियदर्योऽअर्हाद्द्युमाद्वि
भाति क्रतुंमज्जनेषु ॥ यद्दीदयच्छवंसऽऋतप्रजाततदस्मासुद्रविंण
न्धेहिचित्रम् ॥ ॐ भू० सिंधुदेशोद्भव आंगिरसगोत्र पीतवर्ण भो
बृहस्पते इ० बृहस्पतये नमः बृहस्पति० ॥ ५ ॥ हिमकुन्दमृणा-
लाभं दैत्यानां परमं गुरुम् ॥ सर्वशास्त्रप्रवक्तारं शुक्रमावाहया-
म्यहम् ॥ ॐ अन्नात्परिस्रुतो रसंब्रह्मंणाव्यपिबत्क्षत्रं पयः सो
१५ मंप्रजापंतिः ॥ ऋतेनं सत्यमिन्द्रियंविपानं शुक्रमंधंसऽइन्द्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्येन्द्रियमिदंपयोमृतंमधुं ॥ ॐ भू० भोजकटदेशोद्भव भार्गव-
सगोत्र शुक्लवर्ण भो शुक्र इ० शुक्राय नमः ॥ शुकं० ॥ ६ ॥
नीलाम्बुजसमाभासं रविपुत्रं यमाग्रजम् ॥ छायामार्तण्डसम्भूतं
शनिमावाहयाम्यहम् ॥ ॐ शन्नो देवीरभिष्टयऽआपोभवन्तुपीतये ॥
शंय्योरभिस्रवंतुनः ॥ ॐ भू० सौराष्ट्रदेशोद्भव काश्यपसगोत्र
कृष्णवर्ण भो शनैश्चर इ० शनैश्चराय नमः ॥ शनैश्चर० ॥ ७ ॥
अर्द्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् ॥ सिंहिकागर्भसंभूतं

ग्र० ८५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राहुमावाहयाम्यहम् ॥ ॐ कयानश्चित्रऽआभुवदूतीसदावृधः सखा ॥ कयाशचिष्ठयावृता ॥ ॐ भू० राठिनापुरोद्भव पैठिनसगोत्र कृष्णवर्ण भो राहो इ० राहवे नमः ॥ राहुं० ॥ ८ ॥ पालाशधूम्रसंकाशं तारकाग्रहमस्तकम् ॥ रौद्रं रौद्रात्मकं घोरं केतुमावाहयाम्यहम् ॥ ॐ केतुंकृण्वन्नकेतवेपेशोमर्याऽअपेशसे ॥ समुषद्भिरजायथाः ॥ ॐ भू० अंतर्वेदिसमुद्भव जैमिनिसगोत्र कृष्णवर्ण भो केतो इ० केतवे नमः ॥ केतुं० ॥ ९ ॥ ततोऽधिदेवता-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

स्थापनं ग्रहदक्षिणपार्श्वे । पंचवक्त्रं वृषारूढमुमेशञ्च त्रिलोच-
नम् ॥ आवाहयामीश्वरन्तं खट्वाङ्गवरधारिणम् ॥ ॐ त्र्यंबकंय
जामहे सुगंधिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमा
मृतात् ॥ ॐ भू० ईश्वर इहा० ईश्वराय नमः ॥ ईश्वरं० ॥ १ ॥
हेमाद्रितनयां देवीं वरदां शंकरप्रियाम् ॥ लम्बोदरस्य जननीमुमा-
मावाहयाम्यहम् ॥ ॐ श्रीश्चंते लक्ष्मीश्चपत्न्यां वहोरात्रेपार्श्वेनक्ष-
त्राणि रूपमश्विनौव्यात्तम् ॥ इष्णान्निषाणामुम्मंऽइषाणसर्व-

(१) स्कान्दे ॥ शिवः शिवा गुहो विष्णुर्ब्रह्मेन्द्रयमकालकाः । चित्रगुप्तोऽथ भान्वादिदक्षिणे चाधिदेवताः ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोकम्मं ऽइषाण ॥ ॐ भू० उमेहा० उमायै नमः ॥ उमां० ॥ २ ॥
रुद्रतेजस्समुत्पन्नं देवसेनाग्रगं विभुम् ॥ षण्मुखं कृत्तिकासूनुं
स्कन्दमावाहयाम्यहम् ॥ ॐ यदक्रंन्दः प्रथमं जायमानऽउद्य-
न्त्संमुद्द्रादुतवापुरीषात् ॥ श्येनस्यं पुक्षाहंरिणस्यंबाहू उंपस्तुत्य-
म्महिंयातन्तेंऽअर्व्वन् ॥ ॐ भू० स्कन्देहा० स्कन्दाय नमः ॥ स्कन्दं
॥ ३ ॥ देवदेवं जगन्नाथं भक्तानुग्रहकारकम् ॥ चतुर्भुजं रमानाथं
विष्णुमावाहयाम्यहम् ॥ ॐ व्विष्णोर्रराटंमसिव्विष्णोः श्नप्त्रेंस्थो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्विष्णोः स्यूरसिव्विष्णोर्ध्रुवोसि ॥ वैष्णवमसिव्विष्णवेत्वा ॥ ॐ
भू० विष्णो इ० विष्णवे नमः ॥ विष्णु० ॥ ४ ॥ कृष्णाजिनाम्बरधरं
पद्मसंस्थं चतुर्मुखम् ॥ वेदाधारं निरालम्बं विधिमावाहयाम्यहम् ॥
ॐआब्रह्मन्ब्राह्मणोब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्यःशूरऽइषव्व्या
तिव्याधीमहारथोजायतान्दोग्ध्री धेनुर्व्वोढानड्वानाशुः सप्तिः पुर-
न्धिर्योषाजिष्णूरथेष्ठाः सभेयोयुवास्य यजमानस्य व्वीरोजायता
न्निकामे निकामे नः पर्ज्जन्योव्वर्षतुफलवत्योनऽओषधयः पच्य-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्तां योगक्षेमोनं÷कल्पताम् ॥ ॐ भू० ब्रह्मन् इ० । ब्रह्मणे
नमः॥ ब्रह्माण० ॥ ५ ॥ देवराजं गजारूढं शुनासीरं शतक्रतुम्॥
वज्रहस्तं महाबाहुमिन्द्रमावाहयाम्यहम् ॥ ॐ सुयोषांऽइन्द्रस-
गंणोमुरुद्भिः सोमंपिबवृत्रहा शूरोविद्वान् ॥ जुहिशत्रूँ रपमृधो-
नुदस्वाथाभंयङ्कृणुहि विश्वतोनः ॐ भू० इन्द्रेहा० इन्द्राय नमः॥
इन्द्रं० ॥ ६ ॥ धर्मराजं महावीर्यं दक्षिणादिक्पतिं प्रभुम् ॥
रक्तेक्षणं महाबाहुं यममावाहयाम्यहम् ॥ ॐ यमायत्वाङ्गिरस्वते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पितृमते स्वाहा ॥ स्वाहा घर्म्माय स्वाहा घर्मः पित्रे ॥ ॐ भू० यम इ० यमाय नमः ॥ यमं० ॥ ७ ॥ अनाकारमनन्ताख्यं वर्त्त-मानं दिने दिने ॥ कलाकाष्ठादिरूपेण कालमावाहयाम्यहम् ॥ कार्षिरसिसमुद्रस्यत्वाक्षित्याऽउन्नयामि ॥ समापोऽअद्भिरग्मतस मोषधीभिरोषधीः ॥ ॐ भू० कालेहा० कालाय नमः ॥ कालम्० ॥ ८ ॥ धर्मराजसभासंस्थं कृताकृतविवेकिनम् ॥ आवाह-येच्चित्रगुप्तं लेखनीपत्रहस्तकम् ॥ ॐ चित्रावसोस्वस्तितेपार-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मंशीय ॥ ॐ भू० चित्रगुप्तेहा० चित्रगुप्ताय नमः ॥ चित्रगु-
प्तम्० ॥ ९ ॥ ततः प्रत्यधिदेवतास्थापनं ग्रहवामपार्श्वे ॥ रक्तमा-
ल्याम्बरधरं रक्तपद्मासनस्थितम् ॥ वरदाभयदन्देवमग्निमावाह-
याम्यहम् ॥ ॐ अग्निन्दूतं पुरोदधे हव्यवाहमुपब्रुवे ॥ देवाँ२ऽ
आसादयादिह ॥ ॐ भू० अग्ने इ० अग्नये नमः ॥ अग्निम्० ।
॥ १ ॥ आदिदेवसमुद्भूता जगच्छुद्धिकराः शुभाः ॥ औषध्याप्याय-
नकरा अपामावाहयाम्यहम् । ॐ आपोहिष्ठामयो भुवस्तानऽ

टि० १ स्कान्दे । अग्निरापो धरा विष्णुः शक्रेन्द्राणी पितामहाः । पन्नगाकः क्रमाद्वामे ग्रहप्रत्यधिदेवताः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऊर्जे दधातन ॥ महेरणाय चक्षसे ॥ ॐ भू० अप इहागच्छत इह
तिष्ठत अद्भ्यो नमः ॥ अप आ० ॥ २ ॥ शुक्लवर्णां विशालाक्षीं
कूर्मपृष्ठोपरिस्थिताम् ॥ सर्वसस्याश्रयां देवीं धरामावाहयाम्यहम् ॥
ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानः शर्म्म
सप्रथाः ॥ ॐ भू० पृथिवि इ० पृथिव्यै नमः ॥ पृथिवीं० ॥ ३ ॥
शंखचक्रगदापद्महस्तं गरुडवाहनम् ॥ किरीटकुण्डलधरं विष्णु-
मावाहयाम्यहम् ॥ ॐ इदंविष्णुर्विचक्रमे त्रेधानिदधेपदम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समृंढमस्यपाꣳसुरेस्वाहां ॥ ॐ भू० विष्णो इ० विष्णवे नमः ॥
विष्णु० ॥ ४ ॥ ऐरावतगजारूढं सहस्राक्षं शचीपतिम् ॥ वज्रहस्तं
सुराधीशमिन्द्रमावाहयाम्यहम् । ॐ इन्द्रंऽआसान्नेताबृहस्पति-
र्दक्षिणायज्ञः पुरऽएतुसोमः ॥ देवैसेनानांमाभिभंजतीनांजयं-
तीनांमरुतौयंत्वग्रंम् ॥ ॐ भू० इन्द्रेहा० इन्द्राय नमः ॥ इन्द्रमा०
॥५॥ प्रसन्नवदनां देवीं देवराजस्य वल्लभाम् ॥ नानालंकारसं-
युक्तां शचीमावाहयाम्यहम् ॥ ॐ अदित्यैरास्नांसीन्द्राण्याऽउ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ष्णीषं॑॥ पूषासिं॑घर्म्मायं॑दीष्व॥ ॐ भू॰ इन्द्राणि इ॰ इन्द्राण्यै नमः॥
इन्द्राणीं॰ ॥ ६ ॥ आवाहयाम्यहं देवदेवेशं च प्रजापतिम् ॥ अनेक
व्रतकर्तारं सर्वेषां च पितामहम् ॥ ॐ प्रजा॑पते॒नत्वदे॒तान्य॒न्यो
विश्वा॑रू॒पाणि॒परि॒ता बं॑भूव॥ यत्का॑मास्ते जुहु॒मस्तन्नो॑ऽअस्तु॒वयꣳ
स्याम॒ पत॑यो र॒यी॒णाम् ॥ ॐ भू॰ प्रजापते इ॰ प्रजापतये नमः ॥
प्रजापतिमा॰ ॥ ७ ॥ अनन्ताद्यान्महाकायान्नानामणिविराजि
तान् ॥ आवाहयाम्यहं सर्प्पान्फणासप्तकमण्डितान् ॥ ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमोस्तु सर्पेभ्यो ये के चंपृथिवीमनुं ॥ येऽअन्तरिक्षे ये दिवि तेभ्यंः सर्पेभ्यो नमंः ॐ भू० सर्पा इहागच्छत इह तिष्ठत ॥ सर्प्पेभ्यो नमः ॥ सर्पान्० ॥ ८ ॥ हंसपृष्ठसमारूढं देवतागणपूजितम् ॥ आवाहयाम्यहं देवं ब्रह्माणं कमलासनम् ॥ ॐ ब्रह्मंयज्ञानं प्रंथमं पुरस्ताद्विसींमतःसुरुचों वेनऽआंवः ॥ स बुध्न्याऽउपमाऽअंस्य विष्ठाःसतश्च योनिमसंतश्च विवंः ॐ भू० ब्रह्मन् इ० ब्रह्मणे नमः ॥ ब्रह्माणम्० ॥ १ ॥ ततो विनायकादिपंचलोकपालदेवता

१ टि० स्कान्दे—गणेशश्चाम्बिकावायुराकाशश्चाश्विनौ तथा । ग्रहाणामुत्तरे पंच लोकपालाः प्रकीर्त्तिताः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वास्तोष्पतिं क्षेत्रपालं चावाहयेत् ॥ लम्बोदरं महाकायं गजवक्त्रं
चतुर्भुजम् ॥ आवाहयाम्यहं देवं गणेशं सिद्धिदायकम् ॥ ॐ
गणानां त्वा० ॐ भू० गणपते इ० गणपतये नमः गणपतिं०
॥ १ ॥ पत्तने नगरे ग्रामे विपिने पर्वते गृहे ॥ नानाजातिकुलेशानीं
दुर्गामावाहयाम्यहम् ॥ ॐ अम्बेऽअम्बिके० ॐ भू० दुर्गे इ०
दुर्गायै नमः ॥ दुर्गां० ॥ २ ॥ आवाहयाम्यहं वायुं भूतानां देहधा-
रिणम् ॥ सर्वाधारं महावेगं मृगवाहनमीश्वरम् ॥ ॐ व्वायोये

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तैँसहस्रिणोरथांसुस्तेभिरागंहि ॥ नियुत्वान्सोमंपीतये । ॐ भू० वायो इ० वायवे नमः ॥ वायुं० ॥ ३ ॥ अनाकारं शब्दगुणं द्यावा-भूम्यन्तरस्थितम् ॥ आवाहयाम्यहं देवमाकाशं सर्वगं शुभम् ॥ ॐ घृतं घृतपावानः पिबतुव्वसां व्वसापावानःपिबतान्तरिक्षस्य हविरंसिस्वाहां ॥ दिशः प्रदिशऽआदिशो व्विदिशऽउद्दिशो दिग्भ्यः स्वाहां । ॐ भू० आकाशाय नमः ॥ आकाशं० ॥ ४ ॥ देवतानां च भैषज्ये सुकुमारौ भिषग्वरौ ॥ आवाहयाम्यहं देवावश्विनौ पुष्टिव-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्र० द्विनौ ॥ ॐ यावांकशामधुमत्याश्विना सूनृतावती ॥ तया यज्ञंमिं प्र०
१२ मिक्षतम् ॥ ॐ भू० अश्विनौ इहागच्छतां इह तिष्ठतां अश्विभ्यां
नमः॥अश्विनौ आवाहयामि॥५॥वास्तोष्पतिं विदिक्कायं भूशय्या-
भिरतं प्रभुम् ॥ आवाहयाम्यहं देवं सर्वकर्मफलप्रदम् ॥ ॐ वास्तो-
ष्पतेप्रतिजानीह्यस्मान्स्वावेशोऽअनमीवोभवानः ॥ यत्वेमहेप्रति-
तन्नोजुषस्वशन्नोभव द्विपदे शं चतुष्पदे ॥ ॐ भू० वास्तोष्पते इ०
वास्तोष्पतये नमः ॥ वास्तोष्पतिं० ॥ ६ ॥ भूतप्रेतपिशाचाद्यैरावृतं १२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

शूलपाणिनम् ॥ आवाहये क्षेत्रपालं कर्मण्यस्मिन्सुखाय नः ॥ ॐ
नहिस्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेः ॥ एमेनम-
वृधन्नमृताऽअमर्त्यंवैश्वानरंक्षैत्रजित्यायदेवाः ॥ ॐ भू० क्षेत्राधिपते
इ० क्षेत्राधिपतये नमः ॥ क्षेत्राधिपतिमावा० ॥ ७ ॥ अथ मण्डला-
द्बाह्ये दश[1]दिक्पालानावाहयेत् ॥ इन्द्रं सुरपतिश्रेष्ठं वज्रहस्तं महा-
बलम् ॥ आवाहये यज्ञसिद्ध्यै शतयज्ञाधिपं प्रभुम् ॥ ॐ त्रातार-

१. टि० संग्रहे-इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ॥ कुबेर ईशो ब्रह्मा च ह्यनन्तो दश दिक्पतिः ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मिन्द्रंमवितारमिन्द्रꣳ हवेहवेसुहवꣳ शूरमिन्द्रम् ॥ ह्वयामि शक्रं
पुरुहूतमिन्द्रꣳ स्वस्तिनोमघवाधात्विन्द्रः ॥ ॐ भू० इन्द्रेहा०
इन्द्राय नमः ॥ इन्द्रं० ॥ १ ॥ त्रिपादं सप्तहस्तं च द्विमूर्द्धानं द्विना-
सिकम् ॥ षण्नेत्रं च चतुःश्रोत्रमग्निमावाहयाम्यहम् ॥ ॐ त्वन्नोऽ-
अग्नेतवदेवपायुभिर्मघोनोरक्षतन्वश्चवन्द्य ॥ त्रातातोकस्यतनयेग-
वामस्यानिमेषꣳ रक्षमाणस्तवव्रते । ॐ भू० अग्ने इ० अग्नये नमः ॥
अग्नि० ॥ २ ॥ महामहिषमारूढं दंडहस्तं महाबलम् ॥ यज्ञसंर-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्षणार्थाय यममावाहयाम्यहम् ॥ ॐ यमाय त्वांगिरस्वते पितृ-
मंते स्वाहां ॥ स्वाहां घर्म्माय स्वाहां घर्मः पित्रे ॥ ॐ भू० यमेहा०
यमाय नमः ॥ यम० ॥३॥ सर्वप्रेताधिपं देवं निर्ऋतिं नीलविग्रहम् ॥
आवाहये यज्ञसिद्धयै नरारूढं वरप्रदम् ॥ ॐ असुन्वंतमयजमान-
मिच्छस्तेनस्येत्यामन्विंहितस्करस्य ॥ अन्यमस्मादिच्छसातंऽ
इत्यानमोदेवि निर्ऋते तुभ्यंमस्तु ॥ ॐ भू० निर्ऋते इ० निर्ऋतये
नमः ॥ निर्ऋतिं० ॥ ४ ॥ शुद्धस्फटिकसंकाशं जलेशं यादसां पतिम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आवाहये प्रतीचीशं वरुणं सर्वकामदम् ॥ ॐ तत्त्वांयामिब्रह्मंणा
व्वन्दंमानस्तदाशांस्तेयजंमानोहुविर्ब्भिः ॥ अहेडमानोव्वरुणेहबो
ध्युरुंशꣳ समानऽआयुः प्रमोषीः ॥ ॐ भू० वरुण इ० वरुणाय
नमः ॥ वरुणं० ॥ ५ ॥ मनोजवं महातेजं सर्वतश्चारिणं शुभम् ॥
यज्ञसंरक्षणार्थाय वायुमावाहयाम्यहम् ॥ ॐ आनोंनियुद्भिः शति
नींभिरध्वरꣳ संहस्त्रिणींभिरुपंयाहि युज्ञम् ॥ व्वायोऽअस्मिन्त्सवंने
मादयस्वयूयम्पांतस्वुस्तिभिः सदां नः ॥ ॐ भू० वायो इ० वायवे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः ॥ वायुं० ॥ ६ ॥ आवाहयामि देवेशं धनदं यक्षपूजितम् ॥
महाबलं दिव्यदेहं नरयानगतिं विभुम् ॥ ॐ व्वयꣳ सोम व्रतेतव
मनंस्तनूषु बिभ्रंतꣳ ॥ प्रजावंन्तꣳ सचेमहि ॥ ॐ भू० सोमेहा०
सोमाय नमः ॥ सोमं० ॥ ७ ॥ सर्वाधिपं महादेवं भूतानां पतिमव्य-
यम् ॥ आवाहये तमीशानं लोकानामभयप्रदम् ॥ ॐ तमीशांनं
जगंतस्तस्थुषस्प्पतिंन्धियञ्जिन्न्वमवंसेहूमहेव्वयम् ॥ पूषानोयथाव्वे-
दंसामसंद्वृधेरंक्षितापायुरदंब्धꣳ स्वस्तयें ॥ ॐ भू० ईशानेहा०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ईशानाय नमः ॥ ईशानं० ॥ ८ ॥ पद्मयोनिं चतुर्मूर्तिं वेदगर्भं
पितामहम् ॥ आवाहयामि ब्रह्माणं यज्ञसंसिद्धिहेतवे ॥ ॐ अस्मे-
रुद्रामेहनापर्व्वतासोवृत्रहत्येभरंहूतौसजोषाः ॥ यः शꣳ संते स्तुव-
तेधायिपज्ज्र्रऽइन्द्रंज्येष्ठाऽअस्माँ२ऽअंवन्तु देवाः ॥ पूर्वेशानयोर्मध्ये
ॐ भू० ब्रह्मन्० ब्रह्मणे नमः ॥ ब्रह्माणं० ॥ ९ ॥ अनन्तं सर्वनागा-
नामधिपं विश्वरूपिणम् ॥ जगतां शांतिकर्तारं मंडले स्थापया-
म्यहम् ॥ ॐ स्योनापृथिविनोभवान्नृक्षरानिवेशनी ॥ यच्छानः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शर्म्मसुप्रथांः निर्ऋतिपश्चिमयोर्मध्ये ॥ ॐ भू० अनन्तेहा० अन-
न्ताय नमः॥ अनन्तं० ॥ १०॥ अस्यै प्राणाः प्रतिष्ठन्तु अस्यै
प्राणाः क्षरन्तु च॥ अस्यै देवत्वमर्चायै मामहेति च कश्चन॥
ॐ मनोजूतिर्जुषतामाज्ज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टंयज्ञꣳ
समिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामो३ प्रतिष्ठ ॥ ॐ सूर्या-
दिअनन्तांतदेवताः सुप्रतिष्ठिताः वरदाः भवन्तु ॥ सूर्यादि अन-
न्तान्तदेवताभ्यो नमः इति मन्त्रेण आसनाद्युपचारैः प्रत्येक-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्र० मेकत्र वा कांडानुसमयेन पदार्थानुसमयेन वा षोडशोपचारैः ग्र०
९६ संपूज्य प्रार्थयेत् ॥ ब्रह्मा मुरारिस्त्रिपुरांतकारी भानुः शशी भूमि-
सुतो बुधश्च ॥ गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा
भवन्तु ॥ ११ ॥ ग्रहांऽऊर्ज्जाहुतयोव्यन्तोविप्राय मतिम् ॥ तेषांवि-
शिप्रियाणांव्वोहमिषमूर्जᳫं समग्रभमुपयामगृहीतोसीन्द्रायत्वाजु-
ष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् ॥ इति प्रार्थना ॥ अनया ९६
पूजया सूर्यादिअनन्तान्तदेवताः प्रीयन्ताम् ॥ ततो गृहस्येशा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नदिग्भागे कलशस्थापनविधिना रुद्रकलशं संस्थाप्य कलशे
वरुणं असंख्यातरुद्रांश्चावाह्य पूजयेत् ॥ तद्यथा ॥ ॐ असंख्याता
सहस्राणि ये रुद्राऽअधिभूम्याम् ॥ तेषां ॐ सहस्रयोजनेवधन्वा-
नितन्मसि ॥ असंख्यातरुद्रेभ्यो नमः असंख्यातरुद्रानावा० ॥
ॐ मनोजूतिरिति प्रतिष्ठाप्य ॥ असंख्यातरुद्रेभ्यो नमः इति संपूज्य ॥

* अथ कुशकण्डिकाकरणम् *

१७ अग्नेर्दक्षिणतो ब्रह्मासनम् ॥ अग्नेरुत्तरतः प्रणीतासनद्वयम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्रह्मासने ब्रह्मोप[१]वेशनम् ॥ यावत्कर्म समाप्यते तावत्त्वं ब्रह्मा भव इति यजमानः ॥ भवामीति ब्रह्मा वदेत् ॥ (ब्रह्मणानुज्ञा[२]तः प्रणीताप्र[३]णयनम्) (तत्र क्रमः) प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य प्रथमासने निधाय ब्रह्मणो मुखमवलोक्य द्वितीयासने निदध्यात् (ईशानादिपूर्वाग्रैः कुशैः परिस्तरणम्) तद्यथा ॥ ततो बर्हिष[४]श्चतुर्थभागमादाय ॥ आग्नेयादीशानान्तम्

टि० १ पंचाशता भवेद्ब्रह्मा तदर्द्धेन तु विष्टरः । ऊर्ध्वकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः ॥ दक्षिणावर्तो ब्रह्मा च वामावर्तस्तु विष्टरः ॥ विष्टरं सर्वयज्ञेषु लक्षणं परिकीर्तितम् ॥ २ ब्रह्मणा प्राप्तानुशासनः-ब्रह्माकी आज्ञासे ॥ ३ प्रणीताको जल से पूर्ण करना ॥ ४ एकाशीतिकुशो बर्हिः ॥ चतुःषष्टिकुशो बर्हिः ॥ मुष्टिमात्रं कुशो बर्हिः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उदगग्रैर्वा ॥ ब्रह्मणोऽअग्निपर्यन्तं प्रागग्रैः ॥ नैर्ऋत्याद्वायव्यान्तम् उदगग्रैर्वा ॥ अग्नितः प्रणीतापर्यंतं प्रागग्रैः इतरथावृत्तिः (अथ पात्रासादनं पश्चादुत्तरतो वा स्यात्) तद्यथा ॥ त्रीणि पवित्रे[2] द्वे ॥ प्रोक्षणीपात्रं ॥ आज्यस्थाली ॥ चरुस्थाली ॥ संमा[3]र्जनकुशाः पंच ॥ उपयमं[4]नकुशाःसप्त ॥ समिधस्तिस्रः ॥ स्रुवः ॥ आज्यम् ॥ तण्डुलाः ॥ पूर्णपात्रम् ॥ वृषनिष्क्रयदक्षिणा ॥ उपकल्पनीयानि द्रव्याणि निधाय

---

१ पवित्रच्छेदनार्थंकुशत्रयम् । २ पविकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयम् । ३ व्यासस्मृतौ–स्रुवसम्मार्जनार्थन्तु कुशत्रयमुदीरितमिति ॥
४ तत्रैव ॥ उपयमनार्थमाख्याता त्रिषण्णवमिताः कुशाः ॥ वेणीरूपा निरोधार्था निरोधे बहुभिः सुखमिति ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(पवित्रच्छेदनानि) द्वयोरुपरि त्रीणि निधाय ॥ द्वौ मूलेन प्रदक्षिणीकृत्य सर्वान् युगपदनामिकाङ्गुष्ठाभ्यां धृत्वा ॥ त्रिभिश्छिद्य ॥ द्वौ ग्राह्यौ त्रिस्त्याज्यः प्रोक्षणीपात्रे प्रणीतोदकमासिच्य (त्रिः पूर्णं[1]) पवित्राभ्यामुत्पवनम्[2] ॥ प्रोक्षण्याः सव्यहस्तकरणम् ॥ दक्षिणेनोद्दिङ्गनम्[3] ॥ प्रणीतोदकेन प्रोक्षणीप्रोक्षणम् ॥ प्रोक्षण्युदकेन आज्यस्थाल्याः प्रोक्षणम् ॥ चरुस्थाल्याः प्रो० ॥ संमार्जनकुशानां प्रो० ॥

१ टि० सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधातम् ॥ २ द्वाभ्यां अनामिकाङ्गुष्ठाभ्यां गृहीतपवित्राभ्याम् ॥ ३ उद्दिंगनं तु कर्तव्य मूर्ध्वं मूर्ध्वं प्रमाणत ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उपयमनकुशानां प्रो० ॥ समिधां प्रो० ॥ स्रुवस्य[1] प्रो० ॥ आज्यस्य प्रो० ॥ तण्डुलानां प्रो० ॥ पूर्णपात्रस्य प्रो० ॥ उपकल्पनीयानां पदार्थानां प्रो० ॥ असंचरे[2] प्रोक्षणीर्निधाय ॥ आज्यस्थाल्यामाज्यनिर्वापः ॥ चरुस्थाल्यां[3] प्रणीतोदकासेकपूर्वकं तण्डुलप्रक्षेपः ॥ ब्रह्मणोदक्षिणत आज्याधिश्रणम् ॥ चरोरधिश्रयणं स्वयमाज्यस्योत्तरतः ॥ ज्वलदुल्मुकेनोभयोः पर्यग्निकरणम् ॥ इतरथावृत्तिः ॥ उदकोपस्पर्शः ॥ अर्धश्रिते चरौ अधोमुखस्य स्रुवस्य प्रतपनं ॥

१ टि० अनेकस्रुव मासादने सर्वं संमार्जनं प्रोक्षणं च । २ प्रणीताग्न्योर्मध्ये असंचरदेशः (अर्थात् जनसंचारवर्जितदेशे) । ३ सपवित्रायां ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संमार्जनकुशैः स्रुवस्योर्ध्वमुखस्यसंमार्जनम्॥अग्नैरन्तरतो मूलै र्बा-
ह्यतः स्रुवं सम्मृज्य ॥ प्रणीतोदकेनाभ्युक्षणम् ॥ संमार्जनकुशाना-
मग्नौ प्रक्षेपः॥ पुनः प्रतपनं दक्षिणदेशे निधानम् ॥ आज्योद्वास-
नम्॥ चरुं पूर्वेणानीयाग्नेरुत्तरतः स्थापयेत्॥ चारोरुद्वासनं ॥ अग्ने-
रुत्तरत एवाज्यस्य प्रदक्षिणीकृत्य आज्यस्योत्तरतश्चरुं स्थापयेत् ॥
आज्योत्पवनम् ॥ आज्यावेक्षणम् ॥ अपद्रव्यनिरसनम् ॥ पुनः प्रो-
क्षण्युत्पवनम्॥ वामहस्ते उपयमनकुशानादाय॥ उत्तिष्ठन्समिधो-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भ्यादाय घृताक्ताः समिधस्तिस्रः अग्नौ क्षिपेत् ॥ प्रोक्षण्युदकेन सपवित्रहस्तेन ईशानादि अग्नेः प्रदक्षिणं पर्युक्षणम् इतरथावृत्तिः ॥ पवित्रयोः प्रणीतासु निधानम् ॥ दक्षिणंजान्वाच्य ॥ ब्रह्मणा कुशैरन्वारब्धः[1] ॥ समिद्धतमे[2]ऽग्नौ स्रुवेणा[3]ज्यहोमः ॥ अग्नेरुत्तरभागे ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये न मम ॥ अग्नेर्दक्षिणभागे ॥

---

१ टि. अन्वारम्भे कृते होमे ब्रह्मणा दक्षिणे करे ॥ वहुकाष्ठैः समिन्धीयादर्चिष्मन्तं क्रियाक्षमम् ॥ १ ॥ भूरादिनवसुस्विष्टकृति स्वच्छे चतुष्टये ॥ अन्वारब्धो भवेत्तेषु सोऽन्वारम्भः कुशेन हि ॥ २ ॥

२ टि० अतिप्रदीप्ताग्नौ ॥ ३ स्रुवधारणार्थं कारिका ॥ अग्रमध्याच्च यन्मध्यं मूलमध्याच्च मध्यतः ॥ स्रुवं धारयते विद्वान् ज्ञातव्यं च सदा वुधैः ॥ स्रुवहोमे सदा त्यागः प्रोक्षणीपात्रमध्यतः ॥ पाणिहोमे त्यागो न ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ इन्द्राय स्वाहा ॥ इदमिन्द्राय न मम ॥ समिद्धतमे ॥ ॐ अग्नये स्वाहा ॥ इदमग्नये न मम ॥ ॐ सोमाय स्वाहा ॥ इदं सोमाय न मम ॥ ततः सूर्यादिग्रहाणां अधिदेवताप्रत्यधिदेवतागणपत्यादिपञ्चलोकपालवास्तोष्पतिक्षेत्रपालदेवतानां इन्द्रादिदशदिक्पालदेवतानां च प्रत्येकं स[1]मित्[2]तिलच[3]र्वाज्यद्रव्यैः अष्टोत्तरशतमष्टाविंशतिमष्टौ वा

टि० १ अर्कः पलाशः खदिरो ह्यपामार्गश्च पिप्पलः । औदुम्बरशमीदूर्वा कुशाश्च समिधो नव ॥

२ तिल्ली अथवा तिल चावल यव शर्करा घृत युक्त । तत्र प्रमाणम्-तिलार्धं तन्दुलाः प्रोक्ताः तन्दुलार्द्धं यवास्तथा ॥ यवार्द्धं शर्करा प्रोक्ता आज्यभागचतुष्टयम् ॥ १ ॥ अथवा ॥ यवार्द्धं तन्दुलाः प्रोक्ताः तन्दुलार्द्धं तिलास्तथा ॥ तिलार्द्धं शर्करा प्रोक्ता आज्यभागचतुष्टयम् ॥ २ ॥

३ पायसम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जुहुयात् ॥ संकल्पः ॥ अस्मिन्ग्रहशांतिकर्मणि वा अमुकोंख्ये कर्मणि इमानि हवनीयद्रव्याणि या या यक्ष्यमाणदेवतास्ताभ्यस्ताभ्योमया परित्यक्तं न मम ॥ यथा दैवतानि सन्तु ॥ इति कुशकण्डिकाकरणम् ॥

अथ सूर्यादिनवग्रहाणां प्रणवादिस्वाहांतहोममन्त्राः ॥

ॐ गणानांत्वा० धम् स्वाहा ॥ १ ॥ ॐ अम्बेऽअ० नीम् स्वाहा ॥ २ ॥ आकृष्णे० पश्यंन् स्वाहा ॥ १ ॥ ॐ इमन्देवा अ० राजा स्वाहा ॥ २ ॥ ॐ अग्निर्मू० न्वाति स्वाहा ॥ ३ ॥ ॐ उद्बुध्य० सीदत स्वाहा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

॥ ४ ॥ ॐ बृहंस्प० चित्रम् स्वाहा ॥ ५ ॥ ॐ अन्नात्प० मधुं स्वाहा
॥ ६ ॥ ॐ शन्नोदे० तुनः स्वाहा ॥ ७ ॥ ॐ कयान० वृता स्वाहा ॥ ८ ॥
ॐ केतुङ्कृ० यथाᳫस्वाहा ॥ ९ ॥ ॐ त्र्यंम्बकं० मृतात् स्वाहा ॥ १० ॥
ॐ श्रीश्चते० इषाण स्वाहा ॥ ११ ॥ ॐ सदक्कंन्दः० अर्वन् स्वाहा
॥ १२ ॥ ॐ विष्णोररा० वेत्वा स्वाहा ॥ १३ ॥ ॐ आब्रह्म० ताम्
स्वाहा ॥ १४ ॥ ॐ सजोषा० तौनᳫ स्वाहा ॥ १५ ॥ ॐ समाय-
त्वा० पित्रे स्वाहा ॥ १६ ॥ ॐ कार्षिरं० पंधीᳫ स्वाहा ॥ १७ ॥ चि-

प्र० १०१

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रांब्व० शीय स्वाहा ॥ १८ ॥ ॐ अग्निन्दू० दिह स्वाहा ॥ १९ ॥ आ-
पोहि० युचक्षसे स्वाहा ॥ २० ॥ ॐ स्योनापृं० प्रथाः स्वाहा ॥ २१ ॥
इदम्वि० सुरे स्वाहा ॥ २२ ॥ इन्द्रं ऽआ० ग्रम् स्वाहा ॥ २३ ॥ ॐ
अदि० दीष्वस्वाहा ॥ २४ ॥ ॐ प्रजापते० णाम् स्वाहा ॥ २५ ॥
ॐ नमोस्तुस० नमः स्वाहा ॥ २६ ॥ ब्रह्मस० विवः स्वाहा ॥ २७ ॥
ॐ गणानां० धम् स्वाहा ॥ २८ ॥ ॐ अम्बेऽअ० नीम् स्वाहा ॥ २९ ॥
ॐ वायोजेतें० तये स्वाहा ॥ ३० ॥ घृतंघृत० दिग्भ्यः स्वाहा ॥ ३१ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्र० ॐ यावांक० ताम् स्वाहा ॥ ३२ ॥ ॐ वास्तोष्पते० ष्पदे स्वाहा प्र०
१०२ ॥३३॥ ॐ नहिस्पश० देवाः स्वाहा ॥३४॥ ॐ त्रातारमि० त्विन्द्रꣳ
स्वाहा ॥ ३५ ॥ ॐ त्वन्नो अग्ने० व्रते स्वाहा ॥ ३६ ॥ ॐ यमायत्वा०
पित्रे स्वाहा ॥ ३७ ॥ ॐ असुन्वन्त० मस्तु स्वाहा ॥ ३८ ॥ ॐ
तत्त्वांया० मोंषीꣳ स्वाहा ॥३९॥ ॐ आनोंनि० दांनꣳ स्वाहा ॥४०॥
ॐ वयꣳ सो० महि स्वाहा ॥ ४१ ॥ ॐ तमीशानं० स्तये स्वाहा १०२
॥ ४२ ॥ ॐ अस्मेरुद्रा० देवाꣳ स्वाहा ॥ ४३ ॥ ॐ स्योनापृं० प्रथाꣳ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वाहा ॥४४॥ ततः प्रधानहोमः (प्रधानो विष्णुश्चेत्तदा इदं विष्णु-
रिति मंत्रेण ॥ शिवस्य नमंस्ते रुद्र० ॥ अम्बिकायाः अम्बेऽअम्बिके
एवं गणपत्यादिप्रधानश्चेत्तदा तत्तन्मंत्रेण प्रधानहोमः कार्यः)
प्रधानहोमानन्तरंब्रह्मादिमण्डलदेवताश्चएकैकयाज्याहुत्या यक्ष्ये
शेषेण स्विष्टकृदादिहोमः ॥ तद्यथा ॐ अग्नेनयंसुपथां रायेऽ
अस्मान्विश्वांनिदेववयुनांनि विद्वान् ॥ युयोध्युस्मज्जुंहुराणमे-
२८ नोभूयिंष्ठान्तेनमंऽउक्तिंविधेम ॥ १ ॥ ॐ स्वाहास्वधायुताग्नये

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वैश्वानराय नमः इति मंत्रेणाग्निं संपूज्य ॥ ततो हुतशेषद्रव्यंगृही-
त्वा ॥ ब्रह्मणान्वारब्धः स्विष्टकृद्धोमं कुर्यात् ॥ ॐ अग्नये स्वि-
ष्टकृते स्वाहा ॥ इदमग्नये स्विष्टकृते न मम ॥ इति हुतशेषाज्य-
स्य प्रोक्षणीपात्रे प्रक्षेपः (ततो भूरादिनवाहुतयः) ॐ भूः स्वा-
हा ॥ इदमग्नये न मम ॥ ॐ भुवः स्वाहा ॥ इदं वायवे न मम ॥
ॐ स्वः स्वाहा ॥ इदं सूर्याय न मम ॥ ॐ त्वन्नोऽअग्ने॒ वरु॑णस्य
वि॒द्वान्दे॒वस्य॒हेडो॒ऽअवं॑यासिसीष्ठाः॑ ॥ यजि॑ष्ठो॒ वह्नि॑तमः॒ शोशु॑

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चानोव्विश्वाद्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा ॥ इदमग्नीवरुणा
भ्यां न मम ॥ ॐ सत्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसो-
व्युष्टौ ॥ अवयक्ष्वनोव्वरुणꣳ रराणोव्वीहिमृडीकꣳ सुहवोनऽएधि
स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ॥ ॐ अयाश्चाग्नेस्यनभि-
शस्तिपाश्चसत्यमित्त्वमयाऽअसि ॥ अयानोयज्ञंवहास्ययानोधे-
हि भेषजꣳस्वाहा ॥ इदमग्नये अयसे न मम ॥ ॐ येतेशतंवरुण
ये सहस्रं यज्ञियाः पाशा वितता महान्तः ॥ तेभिर्न्नोऽअद्य सवितोत

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ॥ ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमꣳश्रथाय ॥ अथा वयमादित्यव्रते तवानागसोऽअदितये स्याम स्वाहा ॥ इदं वरुणायादित्यायादितये न मम ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये न मम । इति नवाहुतयः ॥ (अग्न्यायतनस्य समंताद्दिक्षु विदिक्षु च दशदिक्पालानां सदीपदधिमाषभक्तबलयो देयाः) तत्र क्रमः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ त्रातारमिन्द्रं० त्विन्द्रं÷। इन्द्राय सांगाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपदाधिमाषभक्तबलिं समर्पयामि ॥ भो इन्द्र स्वां दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शुभकर्ता शांतिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव ॥ अनेन बलिदानेन इन्द्रः प्रीयताम् ॥ एवं सर्वत्र ॥ १ ॥ ॐ त्वन्नो अग्ने० अग्नये सां० ॥ भो अग्ने दिशं रक्ष बलिं० ॥ अ० अग्निः प्री० ॥२॥ यमायंत्वा० पित्रे ॥ यमायसां० मि ॥ भो यम दि० बलिं० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अ० यमः प्री० ॥ ३ ॥ ॐ असुंन्वतमं० ॥ निर्ऋतये सां० बलिं०
मि ॥ भो निर्ऋते दि० ॥ अ० निर्ऋतिः प्री० ॥ ४ ॥ ॐ तत्त्वांया-
मि० षीः ॥ वरुणाय सां भो वरुण दि० ॥ अ० वरुणः प्री० ॥ ५ ॥
ॐ आनोनियु० नः ॥ वायवे सां० मि० ॥ भो वायो दि० ॥ अ० वायुः
प्री० ॥ ६ ॥ ॐ वयꣳ सोम० हि ॥ सोमाय सां० मि । भो सोम दि०
बलिं० ॥ अ० सोमः प्री० ॥ ७ ॥ ॐ तमीशांनं० ये ॥ ईशानाय सां०
मि ॥ भो ईशान दि० ॥ अ० ईशानः प्री० ॥ ८ ॥ ॐ अस्मे रुद्रामे०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वा: ॥ ब्रह्मणे सां० मि ॥ भो ब्रह्मन् दि० ॥ अ० ब्रह्मा प्री० ॥ ९ ॥
ॐ स्योनापृ० प्रथाः । अनन्ताय सां० मि ॥ भो अनन्त दि०
बलिं० ॥ अ० अनन्तः प्री० ॥ १० ॥ ततो ग्रहवेदीसमीपे ग्रहा
दिभ्यः ॥ सदीपमाषभक्तबलयो देयाः ॐ आकृष्णेन० पश्यन्
॥ १ ॥ सूर्याय सांगाय सपरिवाराय सायुधाय सशक्तिकाय ईश्वरा
ग्निरूपाधिदेवताप्रत्याधिदेवतासहिताय एतं सदीपदधिमाषभक्त
बलिं समर्पयामि। भो सूर्य इमं बलिं गृहाण मम सकुटुम्बस्य सपरिवा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रस्य आयुःकर्ता क्षेमकर्ता शुभकर्ता शांतिकर्ता पुष्टिकर्ता तुष्टिकर्ता
वरदो भव। अनेन बलिदानेन सूर्यः प्रीयताम्॥ १॥ ॐ इमन्देवा०
राजा॥ सोमाय सां० उमाऽपरूपाधिदेवताप्रत्याधिदे० मि। भो सोम
इमं बलिं०। अने० सोमः प्री० ॥ २॥ ॐ अग्निर्मू० ति। भौमाय
सां० स्कंदभूमिरूपाधिदेवताप्रत्याधिदे० मि। भो भौम इमं बलिं०॥
अनेन० भौमः प्री० ॥ ३॥ ॐ उद्बुध्यस्वा० त। बुधाय सां०
नारायणविष्णुरूपाधिदेवताप्रत्याधिदेवतास० मि। भो बुध इमं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब० । अनेन० बुधः प्री० ॥ ४ ॥ ॐ बृहस्पते० म । बृहस्पतये
सां० ब्रह्मेन्द्ररूपाधिदेवताप्रत्याधिदे० मि । भो बृहस्पते इमं ब० ॥
अनेन० बृहस्पतिः प्री० ॥ ५ ॥ ॐ अन्नात्परि० धु । शुक्राय
सां० इन्द्रेन्द्राणिरूपाधिदेवताप्रत्याधिदे० मि । भोशुक्र इमं ब० ।
अनेन० शुक्रः प्री० ॥ ६ ॥ ॐ शन्नोदेवी० नः । शनैश्चराय
सां० यमप्रजापतिरूपाधिदेवताप्रत्यधिदे० मि । भो शनैश्चर इमं
ब० ॥ अनेन० शनैश्चरः प्री० ॥ ७ ॥ ॐ कयांनश्चि० ता ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राहवे सां० कालसर्परूपाधिदेवता प्रत्यधिदेवता० मि। भो राहो इमं ब०॥ अनेन० राहुः प्री० ॥ ८ ॥ ॐ केतुंकृण्वं० थाः। केतवे सां० चित्रगुप्तब्रह्मरूपाधिदेवताप्रत्यधिदे० मि०। भो केतो इमं ब०। अनेन० केतुः प्री० ॥ ९ ॥ ॐ गणानांत्वा० म्। गणपतये सां० मि। भो गणपते इमं ब०। अनेन० गणपतिः प्री० ॥ १ ॥ अम्बेअम्बिके० म्॥ दुर्गायै सांगायै० इमं०॥ भो दुर्गे० आयुःकर्त्री क्षे० शां० पु० तु० वरदा भव। अनेन० दुर्गा प्री० ॥ २ ॥ वायोजे० ये।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वायवे सां० मि ॥ भो वायो इमं ब० ॥ अने० वायुः प्री० ॥ ३ ॥
ॐ घृत० हा ॥ आकाशाय सां० मि । भो आकाश इमं
ब० ॥ अने० आकाशः प्री० ॥ ४ ॥ ॐ यावांकशा० म् । अश्वि-
भ्यां सांगाभ्यां० मि । भो अश्विनौ इमं बलिं० ॥ मम० आयुःकर्तारौ०
वरदौ भवतम् । अ० अश्विनौ प्रीयेताम् ॥ ५ ॥ ॐ वास्तोष्पते
प्र० दे । वांस्तोष्पतये सां० मि । भो वास्तोष्पते इमं ब० ॥ अने०
वांस्तोष्पतिः प्री० ॥ अथवा दिक्पालेभ्य एकतन्त्रेणैकमेव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बलिं दद्यात् ॥ ॐ प्राच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोर्द्ध्वायै दिशे स्वाहार्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥ इन्द्रादिदशदिक्पालेभ्यो नमः इति सम्पूज्य (हस्ते जलं गृहीत्वा) इन्द्रादिदशदिक्पालेभ्यः सांगेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्य एतान्सदीपदधिमाषभक्तबलीन्समर्पयामि ॥ प्रार्थना ॥ भोभो इन्द्रादिदशदिक्पालाः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सांगाःसपरिवाराःसायुधाःसशक्तिकाःममस०आयुःकर्तारःक्षेमकर्ता
रःशान्तिकर्तारःपुष्टिकर्तारःतुष्टिकर्तारःवरदा भवत॥ (ततो हस्ते जलं
गृहीत्वा) अनेन बलिदानेन इन्द्रादिदशदिक्पालाःप्रीयन्ताम्॥१॥एवं
सर्वेभ्यो ग्रहेभ्यः एकतन्त्रेणैकमेव बलिं दद्यात्। ॐ ग्रहांऊर्जाहुत
यो व्यन्तोविप्रायमतिम्॥ तेषांविशिप्रियाणां व्रोहमिषमूर्जꣳसमं
ग्रभमुपयामगृहीतोसीन्द्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्वा
 जुष्टतमम्। ग्रहेभ्यो नमः इति संपूज्य (हस्ते जलं गृहीत्वा) सूर्या-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिनवग्रहेभ्यः सांगेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः अधिदेवताप्रत्याधिदेवतागणपत्यादिपञ्चलोकपालवास्तोष्पतिसहितेभ्यः एतं सदीपदधिमाषभक्तबलिं समर्पयामि ॥ (प्रार्थना) भोभो सूर्यादिग्रहाः सांगाः सपरिवाराः सायुधाः सशक्तिकाः अधिदेवताप्रत्याधिदेवतागणपत्यादिपञ्चलोकपालवास्तोष्पतिसहिताः मम सकुटुम्बस्य सपरिवारस्य आयुःकर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारः वरदा भवत (हस्ते जलं गृहीत्वा) ॥ अनेन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बलिदानेन सूर्यादिग्रहाः प्रीयन्ताम् ।

❀ अथ क्षेत्रपालबलिदानम् ❀

एकस्मिन् वंशादिपात्रे कुशानास्तीर्य तदुपरि मनुष्याहार-चतुर्गुणं द्विगुणं वा माषदध्योदनं जलपात्रं च निधाय चतुर्मुखं दीपं प्रज्वाल्य हरिद्राकुंकुमादिपताकायुतं कृत्वा ॥ ॐ नहि-स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेः ॥ एमेनमवृधन्नमृ-ताऽअमर्त्यँवैश्वानरंक्षैत्रजित्यायदेवाः । क्षेत्रपालाय नमः इति पंचो-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पचारैः षोडशोपचारैर्वा संपूज्य (प्रार्थयेत्) नमो वै क्षेत्रपालस्त्वं भूतप्रेतगणैस्सह॥ पूजाबलिं गृहाणेमं सौम्यो भवतु सर्वदा॥१॥पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे॥ आयुरारोग्यं मे देहि निर्विघ्नं कुरु सर्वदा॥२॥ ततो बलिदानम् (हस्ते जलं गृहीत्वा)॥ क्षेत्रपालाय सांगाय सपरिवाराय सायुधाय सशक्तिकाय मारीगणभैरव-राक्षस-कूष्माण्ड-वेताल-भूत-प्रेत-पिशाच-डाकिनी-शाकिनी-पिशाचिनी गणसहिताय एतं सदीपदधिमाषभक्तबलिं समर्पयामि॥ (प्रार्थना)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भो क्षेत्रपाल क्षेत्रं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव ॥ (हस्ते जलं गृहीत्वा) अनेन बलिदानेन क्षेत्रपालः प्रीयताम् ॥ यजमानस्य मस्तकोपरि सकृद्भ्रामयित्वा शूद्रेण बलिं गृहीत्वा चतुष्पथे निक्षिपेत् ॥ ततो यजमानस्तस्य पृष्ठतो द्वारपर्यन्तं गत्वा जलं क्षिपेत् हिंकारेणेति मन्त्रेण ॥ ॐ हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहा वक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय स्वा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हांगन्धायस्वाहा घ्रातायस्वाहानिविंष्टायस्वाहोपंविष्टायस्वाहास
न्दितायस्वाहावल्गंतेस्वाहा सींनाय स्वाहा शयांनायस्वाहा स्वपं-
तेस्वाहाजाग्रंतेस्वाहाकूजंतेस्वाहा प्रबुंद्धायस्वाहांविजृम्भंमाणाय
स्वाहाविचृंत्ताय स्वाहा सङ्हांनायस्वाहोपंस्थितायस्वाहायंनाय
स्वाहाप्रायंणायस्वाहा ॥ यजमानः पाणिपादं प्रक्षाल्याचम्य ॥
ततः नारिकेलफलं रक्तवस्त्रवेष्टितं द्वादशषट्चतुःस्रुवेण गृहीत-
माज्यं स्रुच्यां कृत्वा तस्योपरि नारिकेलफलं संस्थाप्य ॐपूर्णाहुत्यै

ग्र० १११

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः इति षोडशोपचारैः संपूज्य पूर्णाहुतिं जुहुयात् । तत्र मन्त्राः ॥ ॐ समुद्रादूर्म्मिर्म्मधुमाँ२॥ऽउदारदुपा७शुना सममृतत्वमानट् ॥ घृतस्यनाम गुह्यंय्यदस्तिजिह्वादेवानाममृतंस्यनाभिः ॥ १ ॥ व्वयन्नामप्रब्रवामाघृतस्यास्मिन्यज्ञेधारयामानमोभिः ॥ उपब्रह्मा शृणवच्छस्यमानञ्चतुः शृङ्गोवमीद्गौरऽएतत् ॥ २ ॥ चत्वारिशृङ्गात्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँ२ऽआविवेश

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ ३ ॥ त्रिधांहितम्पणिभिर्गुह्यमांनङ्गविंदेवासों घृतमन्ववंविन्दन् ॥
इन्द्रऽएकꣳ सूर्य्यऽएकंञ्जजानव्वेनादेकꣳ स्वधयानिष्टंतक्षुः
॥ ४ ॥ एताऽअर्षन्तिहृद्यांत्समुद्राच्छतव्रंजारिपुणानावचक्षें ॥
घृतस्य धाराऽअभिचांकशीमि हिरण्ययोंव्वेतसोमध्यंऽआसाम्
॥ ५ ॥ सम्यक्स्रंवन्तिसरितोनधेनांऽअन्तर्हृदामनंसापूयमांनाः
॥ एतेऽअर्षन्त्यूर्म्मयोंघृतस्यंमृगाऽइवाक्षिपणोरींषमाणाः ॥ ६ ॥
सिन्धोंरिवप्प्राद्ध्वनेशूंघनासोव्वातंप्प्रमियःपतयान्तियह्वाः ॥ घृतस्य ११२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धारांऽअरुषोनव्वाजीकाष्ठांभिन्दन्नूर्म्मिभिः पिन्वंमानः ॥ ७ ॥
अभिप्प्रंवन्तसमंनेवयोषाः कल्याण्यःस्मयंमानासोऽअग्निम् ॥
घृतस्यधाराःसमिधोंनसन्तताजुंषाणोहर्य्यतिजातवेदाः ॥ ८ ॥
कन्याऽइववहतुमेतवाऽउंऽअञ्ज्यञ्जानाऽअभिचाकशीमि ॥ यत्र
सोमंःसूयतेयत्रंयज्ञोघृतस्यधाराऽअभितत्पंवन्ते ॥ ९ ॥ अभ्य
र्षतसुष्टुतिङ्गव्यंमाजिमस्मासुंभद्राद्रविणानिधत्त ॥ इमंयज्ञन्न-
यतदेवतानाघृतस्यधारामधुंमत्पवन्ते ॥ १० ॥ धामन्तेविश्वम्भु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्र० वंनमधिश्रितमुन्तः संमुद्रेहृद्यन्तरायुंषि ॥ अपामनीकेसमि ग्र०
११३ थेयऽआभृंतस्तमंश्याममधुंमन्तन्तऽऊर्म्मिम् ॥ ११ ॥ पुनंस्त्वा-
दित्यारुद्रावसंवꣳ समिंन्धताम्पुनंर्ब्रह्माणोंवसुनीथयुज्ञैः ॥ घृते-
नत्त्वन्तन्वंवर्धयस्व सत्याः संन्तुयजंमानस्यकामाꣳ ॥ १२ ॥
सप्ततेंऽअग्नेसमिधंः सप्तजिह्वाः सप्तऽऋषंयꣳ सप्तधामंप्रि
याणिं ॥ सप्तहोत्राꣳ सप्तधात्वांयजन्तिसप्त योनीरापृंणस्व
घृतेनस्वाहां ॥ १३ ॥ मूर्द्धानंन्दिवोअंरतिं पृंथिव्याऽवैश्वानरऽमृतऽ ११३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आजातमग्निम् ॥ कविꣳ सम्म्राजमतिथिञ्जनानामासन्नापात्रं
ञ्जनयन्तदेवाः ॥ १४ ॥ पूर्णादर्व्विपरापत सुपूर्णापुनरापत ॥
व्वस्नेवव्विक्रीणावहाऽइषमूर्जꣳ शतक्रतो स्वाहा ॥ १५ ॥
इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रतवे सप्तवते
अग्नयेऽद्भ्यश्च न मम ॥ [ततो वसोर्द्धारां जुहुयात्]
तत्र मंत्राः ॥ ॐ सप्ततेअग्नेसमिधः सु० ॥ १ ॥ शुक्रज्योति
श्चचित्रज्योतिश्चसत्यज्योतिश्चज्योतिष्मांश्च ॥ शुक्रश्चऽऋतपा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्चात्यꣳ हाः ॥ २ ॥ ईदृङ्चान्यादृङ्चसदृङ्चप्प्रतिसदृङ्च ॥ प्र०
मितश्चसम्मितश्चसभराः ॥ ३ ॥ ऋतश्चसत्यश्चध्रुवश्चधरुणं
श्च ॥ धर्त्ताचविधर्ताचविधारयः ॥ ४ ॥ ऋतजिच्चसत्यजिच्चसेनजि
च्चसुषेणश्च ॥ अन्तिमित्रश्चदूरे अमित्रश्चगणः ॥ ५ ॥ ईदृक्षास
ऽएतादृक्षासऽऊषुणः सदृक्षासः प्प्रतिसदृक्षासऽएतन ॥ मितासश्च
सम्मितसोनोऽअद्यसभरसोमरुतोयज्ञेऽअस्मिन् ॥ ६ ॥ स्वतवाँश्च
प्रघासीचसान्तपनश्चगृहमेधीच ॥ क्रीडीचशाकीचोज्जेषि ॥ ७ ॥ ११४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इन्द्रुन्दैवीर्व्विशोमुरुतोनुंवर्त्मानो भवन्त्यथेन्द्रुन्दैवीर्व्विशोमुरुतोनुंव-
र्त्मानोभंवन् ॥ एवमिमंयजमानुन्दैवीश्चुविशोमानुषीश्चानुंव
र्त्मानो भवन्तु ॥ ८ ॥ इम ७ँ स्तनमूर्ज्जस्वन्तन्धयापाम्प्रपीन
मग्नेसरिरस्यमध्ये ॥ उत्संञ्जुषस्वमधुंमन्तमर्व्वन्त्समुद्रियुं सदं
नमाविशस्व ॥ ९ ॥ घृतम्मिमिक्षेघृतमस्यु योनिर्घृतेश्रितोघृत-
म्वंस्यधाम ॥ अनुष्वधमावंहमादयंस्व स्वाहां कृतं वृषभवक्षिहु
 व्यम् ॥ वसोःं पवित्रंमासिशतधारंव्वसोःपवित्रंमासिसहस्रंधारम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देवस्त्वांसवितापुंनातुव्वसोः पवित्रेणशतधारेणसुप्वाकामंधुक्षः स्वाहा ॥ १० ॥ ततोऽग्निं प्रदक्षिणीकृत्य पश्चिमदेशे प्राङ्मुख उपविश्य ॥ ततः स्रुवेण भस्मानीय अनामिकया ॐ त्र्यायुषं जमदग्नेः इति ललाटे । कश्यपस्य त्र्यायुषम् इति ग्रीवायाम् । यद्देवेषु त्र्यायुषम् इति दक्षिणबाहुमूले । तन्नोऽअस्तुत्र्यायुषमिति हृदि ॥ संस्रवप्राशनम् ॥ आचमनम् ॥ पवित्राभ्यां मार्जनम् ॥ अग्नौ पवित्रप्रतिपत्तिः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्रह्मणे पूर्णपात्रदानम् ।

कृतस्य ग्रहशान्तिहोमकर्मणोऽङ्गतया विहितमिदं पूर्णपात्रं सदक्षिणं ब्रह्मणे तुभ्यमहं सम्प्रददे ॥ ॐ द्यौस्त्वा ददातु पृथिवीत्वा प्रतिगृह्णातु ॥ अग्नेः पश्चात्प्रणीताविमोकः ॥ ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् ॥ उपयमनकुशैर्मार्जयेत् ॥ उपयमनकुशानामग्नौ प्रक्षेपः ॥ ब्रह्मग्रन्थि विमोकः ॥ (ततः श्रेयः सम्पाद्य दानम्) ॥ अद्येत्यादिकृतस्य ग्रहशांत्याख्यस्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्मणो यजमानाय श्रेयोदानं करिष्ये ॥ भवन्नियोगेन मया अस्मिन् ग्रहशान्त्याख्ये कर्मणि (अमुकाख्ये कर्मणि वा) यत्कृतं आचार्यत्वं तदुत्पन्नं श्रेयः तत् अमुना साक्षतेन सजलेन पूगीफलेन तुभ्यमहं सम्प्रददे ॥ प्रतिगृह्यताम् ॥ देवस्य त्वेति प्रतिगृह्णामि ॥ तेन श्रेयसा त्वं श्रेयोवान्भव ॥ भवामीति तेन वाच्यम् ॥ एवमेव ब्रह्मादयो ऋत्विजो जापकादयश्च दत्त्वा (यद्वा) ब्रह्मादयो ऋत्विजो जापकाश्च आचार्यद्वारा श्रेयोदानं कुर्युः ॥ तद्यथा ॥ भवन्नियोगेन मया

ग्र० ११६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्मिन् ग्रहशान्त्याख्ये कर्मणि (अमुकाख्ये कर्मणि वा) यत्कृतं आचार्यत्वं तथा एभिर्ब्राह्मणैः सह यत्कृतं ब्रह्मत्वं गाणपत्यं सदस्यत्वं तथा च यः कृतो जपः आचार्यत्वाद् ब्रह्मत्वाद् गाणपत्यात् सदस्यत्वाज्जापकत्वात् यदुत्पन्नं श्रेयस्तदमुना साक्षतेन सजलेन पूगीफलेन तुभ्यमहं सम्प्रददे ॥ तेन श्रेयसा त्वं श्रेयोवान्भव ॥ भवामीति तेन वाच्यमिति ॥ तत आचार्यादीन् वृणीत ब्राह्मणान्गन्धवस्त्रालंकारादिभिर्यथाविभवैः पूजयेत् ॥ आचार्यादिभ्योब्राह्मणे-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भ्यो दक्षिणां दद्यात् ॥ तत्रायं क्रमः ॥ आचार्याय गां दद्यात् ॥ १ ॥ ब्रह्मणे वृषभम् ॥ २ ॥ सदस्याय अश्वम् ॥ ३ ॥ गाणपत्यायरथं ॥ ४ ॥ उपद्रष्टे गंत्रीम् ॥ ५ ॥ ऋत्विग्भ्यः सुवर्णं दद्यात् ॥ ६ ॥ कृतस्य ग्रहशान्तिकर्मणः (वा अमुककर्मणः) सांगतासिद्ध्यर्थं तत्संपूर्णफलप्राप्त्यर्थमिदं गोनिष्क्रयभूतं द्रव्यं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय आचार्याय तुभ्यमहं सम्प्रददे ॥ ॐस्वस्तीति पठेत् ॥ १ ॥ कृ० इदं वृषनिष्क्रयभूतं द्रव्यं य०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ २॥ कृ० इदं सदस्याय अश्वनिष्क्रयभू० ॥ ३ ॥ कृ० इदं गाणपत्यायरथनिष्क्रयभू० ॥ ४॥ कृ० इदं उपद्रष्ट्रे गंत्रीनिष्क्रयभू० ॥५॥ कृ० इदं ऋत्विग्भ्यः सुवर्णनिष्क्रयभू० ॥ ६ ॥ ततो ब्राह्मणभोजनसंकल्पं कुर्यात् ॥ कृतस्य ग्रहशांतिकर्म० यथासंख्याकान्ब्राह्मणान् यथाकाले यथोत्पन्नेनान्नेनाहं भोजयिष्ये ॥ भोजनांते तेभ्यस्ताम्बूलदक्षिणां च दास्ये ॥ ततो ग्रह (वा प्रधान) पीठदेवतानां गन्धादिपंचोपचारैरुत्तरपूजनं कुर्यात् ॥ गणपत्याद्यावाहितदेवताभ्यो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः ॥ आचार्याय प्रधानपाठीादि दद्यात् ॥ कृ० थें इदं प्रधानपीठं ग्रहपीठं मातृकापीठं सोपस्करं दक्षिणासहितं आचार्याय तुभ्यमहं संप्रददे ॥ ततो रुद्रकलशदेवतान्तरकलशोदकमेकास्मिन्पात्रे कृत्वा दूर्वापंचपल्लवैरुदङ्मुखआचार्यास्तिष्ठन् चत्वारो ऋत्विजश्च सकुटुम्बं स्वोत्तरतः सपत्नीकं यजमानं प्राङ्मुखमुपाविष्टमभिषिञ्चेयुः ।

* तत्राभिषेकमन्त्राः *

देवस्यंत्वासावितुः प्रंसवेऽश्विनोर्बाहुभ्यांम्पूष्णोहस्तांभ्याम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सरस्वत्यैव्वाचोयन्तुर्यन्त्रियैदधामिबृहस्पतेष्ट्वा साम्राज्येनाभिषि-
ञ्चाम्यसौ ॥ १ ॥ देवस्यत्वासवितुःप्रसवेश्विनोर्ब्बाहुभ्याम्पूष्णो हस्ता-
भ्याम् ॥ सरस्वत्यैव्वाचोयन्तुर्यन्त्रेणाग्नेःसाम्राज्येनाभिषिञ्चामि ॥ २ ॥
देवस्य त्वा सवितुः प्रसवेश्विनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ अश्वि-
नोर्भैषज्येनतेजसेब्रह्मवर्च्चसायाभिषिंचामिसरस्वत्यैभैषज्येनव्वीर्या
यान्नाद्यायाभिषिंचामीन्द्रस्येन्द्रियेणबलायश्रियै यशसेऽभिषिं-
चामि ॥ ३ ॥ ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥ १ ॥ प्रद्युम्नश्चानि
रुद्धश्च भवन्तु विजयाय ते ॥ आखण्डलोऽग्निर्भगवान् यमो वै नि-
र्ऋतिस्तथा ॥ २ ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥
ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते सदा ॥ ३ ॥ कीर्तिर्लक्ष्मी-
र्धृतिर्मेधा पुष्टिः श्रद्धाक्रियामतिः ॥ बुद्धिर्लज्जावपुः शान्तिः कान्ति-
स्तुष्टिश्च मातरः ॥ ४ ॥ एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समा-
गताः ॥ आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥ ५ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रहास्त्वामभिषिञ्चन्तु राहु केतुश्च तर्पिताः ॥ देवदानवगन्धर्वा
यक्षराक्षसपन्नगाः ॥ ६ ॥ ऋषयो मनवो गावो देवमातर एव च।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसाङ्गणाः॥ ७ ॥ अस्त्राणि
सर्वशस्त्राणि राजानो वाहनानि च॥ औषधानि च रत्नानि काल-
स्यावयवाश्च ये ॥८॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः॥
एते त्वामभिषिञ्चन्तु धर्मकामार्थसिद्धये ॥ ९ ॥ अमृताभिषेकोऽ
स्तु॥ शान्तिः पुष्टिस्तुष्टिश्चास्तु ॥ अन्येभ्यो ब्राह्मणेभ्यो यथाश-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्ति भूयसीं दक्षिणां दद्यात् ॥ कृ० थं तन्मध्ये न्यूनातिरिक्तदोषप-
रिहारार्थं नानानामगोत्रेभ्यो नानाशर्मभ्यो ब्राह्मणेभ्यः समाश्रित-
बन्धुवर्गेभ्यो दीनानाथेभ्यश्च यथोत्साहां भूयसीं दक्षिणां
विभज्य दातुमहमुत्सृजे ॥

अथावाहितदेवतानां विसर्जनम् ।

ततो देवताग्निं सानुनयं विसृज्य ॥ ॐ उत्तिष्ठंब्रह्मणस्पते
देवयन्तंस्त्वेमहे। उपप्रयंन्तुमरुतंःसुदानंवऽइन्द्रंप्राशूर्भवासचां ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यान्तु देवगणाः सर्वे पूजामादाय मामकीम् ॥ इष्टकामार्थसिद्ध्यर्थं
पुनरागमनाय च । आवाहितदेवताः स्वस्थाने गच्छत ॥ १ ॥ ॐ
यज्ञंयज्ञङ्गच्छयज्ञपंतिङ्गच्छ स्वांयोनिङ्गच्छस्वाहां ॥ एषतेयज्ञो
यंज्ञपतेसहसूंक्तवाकꣳ सर्व्वंवीरस्तञ्जुंषस्वस्वाहां । गच्छ गच्छ सुर-
श्रेष्ठ स्वस्थाने परमेश्वर । यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥
यज्ञनारायण स्वस्थाने गच्छ ॥ २ ॥ ॐ चतुर्भिश्च चतुर्भिश्च
द्वाभ्यां पञ्चभिरेव च ॥ हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः ॥ मया यत्कृतं यथाकालं यथादेशं यथाज्ञानं यथाशक्ति ग्रहयज्ञाख्यं कर्म तेन श्रीपापापहा महाविष्णुः प्रीयताम् ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ सकुशजलं भूमौ क्षिपेत् करौ संपुटीकृत्य ॥ मया यत्कृतं ग्रहयज्ञाख्यं कर्म तत्कालहीनं भक्तिहीनं श्रद्धाहीनं भवतां ब्राह्मणानांवचनात् श्रीसूर्याद्यावाहितदेवताप्रसादात्सर्वंविधेः परिपूर्णमास्त्विति भवन्तो ब्रुवन्तु ॥ अस्तु परिपूर्णं इति ब्राह्मणाः वदेयुः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्षमाप्रार्थना। जपच्छिद्रं तपश्छिद्रं यच्छिद्रं शान्तिकर्मणि॥ सर्वं भवतु मेऽच्छिद्रं ब्राह्मणानां प्रसादतः॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु॥ न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम्॥ ॐ विष्णवे नमः॥ ३॥ ततः तिलकाशीर्वादः॥ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते॥ धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ॥ शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥ यज्ञान्ते ब्राह्मणान्भोजयित्वा दीनानाथांश्चान्नादिना सन्तोष्य स्वयं सुहृन्मित्रादियुतः सोत्साहं सन्तुष्टो हविष्यं भुञ्जीतेति शिवम् ।

इति श्रीकाशीस्थ-सुप्रसिद्धमध्यमेश्वर-वास्तव्येनाऽग्निहोत्रिणा पं० श्रीवायुनन्दनमिश्रकर्मकाण्डिना निर्मितोऽयं ग्रहप्रयोगः समाप्तः ।

पुस्तक-प्राप्ति-स्थानम्—

मास्टर खेलाड़ी लाल ऐण्ड सन्स, संस्कृत बुकडिपो, कचौड़ी गली, बनारस सिटी ।

मास्टर खेलाड़ीलाल ऐण्ड सन्स, संस्कृत बुकडिपो, मुरादपुर, बाँकीपुर, पटना ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

* श्रीयुत पं० वायुनन्दनजी अग्निहोत्री कृत पुस्तकें *

अर्कविवाहः ... ... -)॥
उपनयनपद्धतिः टिप्पणीसहिता (च. सं.) ... ≡)
कुम्भविवाहः ... ... -)
गयाश्राद्धपद्धतिः मूलमात्रम् ... ... ≡)
ग्रहप्रयोगः-अर्थात् ग्रहशान्तिः (पं. सं.) ... ।।।)
पुराणोक्तवास्तुप्रतिष्ठासहितग्रहशांतिः ... ॥=)
गोदानपद्धतिः ... ... -)
चतुर्लिङ्गतोभद्रचक्रम्—सुमनोहरम् ... -)॥
दुर्गासप्तशती-पत्रात्मकम् (तृ. सं.) ... ।।।)
दुर्गासप्तशती-कौशेयवस्त्राच्छादनयुता ... ।।।=)
नवग्रहचक्रम्— ... ... -)
नारायणबलिप्रयोगः भा० टी० ... ... ॥=)

पञ्चदान पद्धतिः-मूलमात्रम् ... ... =)
पञ्चाङ्गपद्धतिः— " ... ... ≡)
प्रतिष्ठामहोदधिः— " ... ... १।।।)
प्रेतमञ्जरी-भाषाटीकासहिता ... ... ।।।)
मण्डपकुण्डसिद्धिः-भा० टी० ... ... ।=)
मूलशान्तिः—मूलमात्रम् (द्वि. सं०) ... ≡)
अस्याः हृदयानन्दजनकं चक्रम् ... ... =)
रामविवाहपद्धतिः ... ... =)॥
रुद्रयागपद्धतिः होमप्रकारसहिता ... १।)
वास्तुशान्तिप्रयोगः—(द्वितीयसंस्करणम्) ... ।=)
वाशिष्ठीहवनपद्धतिः— " ... ≡)
विवाहपद्धतिः-टिप्पणीसहिता (अष्टमसंस्करणम्) ≡)

विवाहपद्धतिः—पुराणोक्ता ... ... =)
विष्णुयागपद्धतिः— " ... ... ।।।)
शूद्रैकोद्दिष्टपार्वणश्राद्धपद्धतिः ... -)॥
शूद्रदशगात्र-एकादशाह-वृषोत्सर्ग-सपिण्डन-
श्राद्धपद्धतिः ... ... ≡)
श्राद्धसंग्रहः—नूतन श्राद्धविवेकः मूलमात्रम्(द्वि.सं.) १॥)
श्रावणीप्रयोगः—मूलमात्रम् ... ... ॥)
श्रीसत्यनारायणव्रतकथा - चमत्कारसंयुक्त -
हिन्दीटीकासहिता (चतुर्थसंस्करणम्) ।-)
शिलान्यासदेहलीन्यासपद्धतिः ... =)॥
सर्वताभद्रचक्रम् - अतीवरमणीयकम् ... =)॥
त्रिपिण्डीश्राद्धपद्धतिः-मूलमात्रम्... ... ।)

विविधपुस्तकप्राप्तिस्थानम् —

मास्टर खेलाड़ीलाल एण्ड सन्स "संस्कृत बुकडिपो"
कचौड़ी गली, बनारस सिटी।

मास्टर खेलाड़ीलाल एण्ड सन्स "संस्कृत बुकडिपो"
मुरादपुर, बाँकीपुर, पटना।

Published by J. N. Yadava for Master Khelarilal & Sons, Kachaurigali, Benares City.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ इति ग्रहप्रयोगः, अर्थात् ग्रहशान्तिः ॥

काश्यां रामघट्टे हितचिन्तकाभिधे मुद्रणालये कृ० व० पावगी इत्येतैर्मुद्रितम् : ३६१८ a

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection